केरलपाठावलिः

# संस्कृतम्

## नवमी कक्ष्या

संस्कृतविद्यालयानां कृते

# KERALA READER SANSKRIT

## STANDARD
## 9

For Sanskrit Schools only

Government of Kerala

Department of Education

2016

# राष्ट्रगीतम्

जनगण मन अधिनायक जय हे
भारत भाग्यविधाता।
पंजाब सिन्ध गुजरात मराठा
द्राविड उत्कल बंगा।
विन्ध्य हिमाचल यमुना गंगा
उच्छलजलधि तरंगा।
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय-गाथा।
जनगण मंगलदायक जय हे
भारत भाग्यविधाता
जय हे जय हे जय हे
जय जय जय जय हे।

# प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रीयेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

---

**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram 695 012, Kerala
*Website* : www.scertkerala.gov.in
*e-mail* : scertkerala@gmail.com
Phone : 0471 - 2341883, Fax : 0471 - 2341869
Typesetting and Layout : SCERT; Printed at : KBPS, Kakkanad, Kochi
© Department of Education, Government of Kerala

# भूमिका

प्रियच्छात्र !

परिष्कृता अस्माकं पाठ्यपद्धतिः प्रवर्तनाधिष्ठिता छात्रकेन्द्रीकृता च भवति। छात्राणां सर्वतोमुखं विकासमेव अस्याः पद्धतेः लक्ष्यम्। तदनुसारमेव पाठ्यक्रमः स्वीकृतः। पाठ्यक्रमे पाठपुस्तकस्य अद्वितीयं स्थानमस्ति। स्वयं पठनाय सङ्घपठनाय भाषानैपुणीनां विकासाय च पाठपुस्तकमुपकरोति।

अष्टमकक्ष्यायाः अनुस्यूततया एवास्य पुस्तकस्य रचना प्रवृत्ता। विविधानां व्यवहाररूपाणां परिचायनाय पुस्तकेऽस्मिन् पठनसन्दर्भाः आयोजिताः। पठितानामाशयानां द्रढीकरणाय नूतनसन्दर्भेषु प्रयोगाय स्वयं मूल्यनिर्णयाय चावकाशः यथायोग्यं दत्ताः।

पुस्तकेऽस्मिन् पञ्च एककानि सन्ति। विषयानुसारमेव एककानां नामानि।प्रत्येकम् एककस्य प्रारम्भे आमुखम् पठनाधिगमाः प्रवेशकप्रवर्तनं च दत्तमस्ति।पाठस्यान्ते प्रवर्तनानि अधिकपठनांशाः चाक्रिकारोहणप्रक्रिया च दत्ताः। पाठभागे अधिकसूचनार्थं केचन भागाः प्रत्येकं पङ्क्तिषु दत्तः। एष भागः अधिकांशस्वीकाराय एव न तु मूल्यनिर्णयाय । एककानामन्ते शब्दकोशः पृथक् दत्तः। पाठभागेष्वागतानां व्याकरणांशानां विवरणं यथास्थानं दत्तमस्ति।

भाषापठनमनायासं सुखप्रदं च कर्तुं पाठपुस्तकमिदं पर्याप्तमिति चिन्तयामि। संस्कृतपठनं सर्वदा मधुरं सफलं च भवतु इति आशंसे।

डा॰ पी ए फात्तिमा
निदेशका
राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्,केरलम्।

## TEXT BOOK DEVELOPMENT COMMITTEE

## SANSKRIT STANDARD IX

### PARTICIPANTS

1 ANITHA S ,HSA, GGHSS Cottonhill, TVPM.
2 ARAVINDHAKSHAN N, UPSA(Rtd.) GUPS Mangaram,Pathanamthitta.
3 LEKHA K .HSA, SNVSHS, Thrikkaruva, Kollam.
4 RAJALAKSHMI PILLAI, HSA, Thevalakkara BoysHS, Kollam.
5 REMA T, HM,PSHS Chittur, Palakkad.
6 SABAREES.M.HSS.Mundur, Palakkad.
7 SANKARANARAYANAN .A. HSST, GSHSS Trippunithura, Ekm.

### EXPERTS

1 **Dr.G.Sahadevan,** (Rtd.) Prof. in Sanskrit, University College, Tvm.
2 **Dr. K.Mohandas,** Sr.Lect.DIET(Rtd.) UCTE Muvattupuzha.
3 **V. Madhavan Pillai**, (Rtd.) Prof.in Sanskrit, Govt.College for Women,Tvm.
4 **N.K.Ramachandran**, (Rtd.) DEO, Wayanad.

### ARTISTS

1 **Sreedharan T.P,** Drawing Teacher, Ramavilasam HSS Chokli, Kannur.
2 **Varghese Kalathil**, Drawing Teacher, GHSS,.Pallikkunnu, Kannur.

### LAYOUT & GRAPHICS

**Sreedharan T.P,** Drawing Teacher, Ramavilasam HSS Chokli, Kannur.

### ADVISOR

**Dr. Prof.Vasudevan Potti.R**, (Rtd.) Govt.Sanskrit College,Thiruvananthapuram.

### ACADEMIC CO-ORDINATOR

**Dr. Shameeja.P,** Research Officer (Sanskrit) SCERT.

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः
STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING , KERALA

# विषयानुक्रमणिका


| | एककम् | | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|---|---|
| I | ऐतिहासिकम् | १ | कृष्णलीला | (काव्यम्) | ८ |
| | | २ | समागमः | (नाटकम्)। | २३ |
| | | ३ | परधर्मो भयावहः | (कथा)। | ३४ |
| II | शास्त्रम् | ४ | अलङ्कारः | | ३९ |
| | | ५ | वृत्तपरिचयः । | | ४३ |
| III | वैज्ञानिकम् | ६ | सन्धिप्रकरणम् | | ५२ |

## पुस्तकसंरक्षणम्

‘तैलाद्रक्ष जलाद्रक्ष रक्ष मां शलथबन्धनात्।
परहस्तगताद्रक्ष’- नित्यं रोदिति पुस्तकम्।।

## संस्कृतभाषा

भाषासु मधुरा रम्या हृद्या गीर्वाणभारती

## विद्यायाः महत्वम्

**सर्वेषां शोभमानानां शोभनतमा विद्या**

# एककम् -१

## ऐतिहासिकम्

आमुखम्

भारतीयसंस्कृतेः जीवातुभूता भवति संस्कृतभाषा। अस्याः भाषायाः कृते इतिहासपुराणादिभिः सत्साहित्यैः दत्तं योगदानं वर्णनातीतमेव। वंशपरम्परायै मूल्याधिष्ठितं ज्ञानमादातुं प्राचीनैः ऋषिवर्यैः स्वीकृतः यत्नः महनीय एव। महाकाव्यशाखा, कथासाहित्यम्, दृश्यप्रधानानि नाटकानि च स्वस्वप्रभावेन सन्मार्गोपदेशसुबोधाय स्वीकृतं महत्वं अवितर्कमेव।

एककेऽस्मिन् त्रयः पाठाः विद्यन्ते । मेल्पत्तूर्नारायणभट्टतिरिमहाशयेन विरचितं नारायणीयस्तोत्रकाव्यात् बाललीला, महाकवेः भासस्य त्रयोदशनाटकेष्वन्तर्भूतः मध्यमव्यायोगस्थसमागम्,एका हितोपदेशकथा च अस्मिन् एकके अन्तर्भवति।

### पठनाधिगमाः

- काव्यं सतालमालपति ।
- कृत्यप्रत्ययान् विवेचति।
- अन्वयं लिखति।
- आशयं वदति लिखति च।
- पात्रानुसारं अभिनयं करोति।
- कथापात्राणि निरूपयति।

## पाठः - १

# कृष्णलीला



### आमुखम्

श्रीमन्नारायणभट्टपादेन विरचितस्य नारायणीयस्य पञ्चचत्वारिंशत्तमे दशके श्रीकृष्णस्य सुन्दरसुभगा बालक्रीडाः नितरां वर्ण्यन्ते, क्वचिन्मृदुहासैः क्वचिद्रिंखणैः कदाचिन्मधुरचुम्बनैश्च सबलो कृष्णः गोपीः गोपांश्चातितरां पुलकितगात्रांश्चकार। सुललितपदविन्यासैः सरलकोमलभावैश्च युक्तोऽयं भागः एव पाठ्यांशत्वेन स्वीकृतः।

**अयि सबल मुरारे पाणिजानुप्रचारैः**
**किमपि भवनभागान् भूषयन्तौ भवन्तौ।**
**चलितचरणकञ्जे मञ्जुमञ्जीरशिञ्जा-**
**श्रवणकुतुकभाजौ चेरतुश्चारुवेगात् ।।**

### पदच्छेदः

चेरतुश्चारुवेगात् - चेरतुः + चारुवेगात् ।

### विग्रहः

सबलः - बलेन सहितः।
पाणिजानुप्रचारैः - पाणी च जानू च पाणिजानू , तयोः प्रचारः, तैः।
भवनभागान् - भवनस्य भागः, तान्।
चलितचरणकञ्जे - चरणमेव कञ्जः चरणकञ्जः, चलिते चरणकञ्जे।
मञ्जुमञ्जीरशिञ्जाश्रवणकुतुकभाजौ - मञ्जीरस्य शिञ्जा मञ्जीरशिञ्जा, मञ्जु च इयं मञ्जीरशिञ्जा, तस्याः श्रवणं, तस्मिन् कुतुकभाक्, तौ।

### धातुपदलकाराः

चेरतुः - चर् गतौ भक्षणे च इति धातोः परस्मैपदी लिट् प्रथमपुरुषद्विवचनं रूपम्।

चचार चेरतुः चेरुः।

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| अयि सबल मुरारे | - | बलरामसहित हे कृष्ण। |
| भवन्तौ | - | भवान् बलरामश्च । |
| पाणिजानुप्रचारैः | - | पाणिद्वयेन जानुद्वयेन कृतैः चंक्रमणैः। |
| भवनभागान् | - | गृहभूमिभेदान्। |
| किमपि भूषयन्तौ | - | अनिर्वचनप्रकारेण भूषयन्तौ। |
| मञ्जुमञ्जीरशिञ्जाश्रवणकुतुकभाजौ | - | मनोहरनूपुरध्वनिश्रवणे कुतुकमावहन्तौ। |

| | | |
|---|---|---|
| चलितचरणकञ्जे | - | चलितपादाम्बुजौ। |
| वेगात् | - | जवेन। |
| चारु | - | मनोहरम्। |
| चेरतुः | - | युवां विचरन्तौ आस्ताम्। |

**भावार्थः**

हे बलभद्रसहित कृष्ण! भवन्तौ (बलरामकृष्णौ) रिंखणैः गृहभागान् विभूषयन्तौ तथा मनोहरनूपुरध्वनिश्रवणे कुतुकिनौ भूत्वा वेगात् विचरन्तावास्ताम्।

**मृदु मृदु विहसन्तावुन्मिषद्दन्तवन्तौ**
**वदनपतितकेशौ दृश्यपादाब्जदेशौ।**
**भुजगलितकरान्तव्यालगत्कङ्कणाङ्कौ**
**मतिमहरतमुच्चैः पश्यतां विश्वनृणाम्।।**

**पदच्छेदः**

विहसन्तावुन्मिषद्दन्तवन्तौ - विहसन्तौ + उन्मिषत् + दन्तवन्तौ

**विग्रहवाक्यम्**

| | | |
|---|---|---|
| उन्मिषद्दन्तवन्तौ | - | उन्मिषन्तः दन्ताः अनयोः सन्तीति। |
| वदनपतितकेशौ | - | वदने पतितानि केशानि ययोः तौ। |
| दृश्यपादाब्जदेशौ | - | पादावेव अब्जौ पादाब्जौ। तयोः देशः पादाब्जदेशः। द्रष्टुं योग्यौ दृश्यौ पादाब्जदेशौ। |
| भुजललितकराग्रव्यालगत्कङ्कणाङ्कौ | - | भुजाभ्यां गलितः भुजगलितः, करान्ते व्यालगत् करान्तव्यागलत्, भुजगलितः च करान्तव्यागलत् च भुजगलितकरान्तव्यागलत्, तादृशं कङ्कणम् अङ्के ययोः, तौ। |

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| मृदु मृदु विहसन्तौ | - | अन्तरान्तरा यत्किञ्चिदवलोक्य मृदु मुग्धहासं कुर्वाणौ। |

| | | |
|---|---|---|
| उन्मिषद्दन्तवन्तौ | - | दृश्यमानदन्तमुकुलौ। |
| वदनपतितकेशौ | - | मुखे पतितालकौ। |
| दृश्यपादाब्जदेशौ | - | ध्वजवज्रादिभिः अङ्कितत्वात् दर्शनीयौ पादाम्बुजौ। |
| भुजगलितकरान्तव्यालगत्कङ्कणाङ्कौ | - | भुजोपरिदेशात् गलितत्वात् मणिबन्धलग्नकङ्कणयुक्तौ। |
| उच्चैः | - | निरतिशयम्। |
| पश्यतां विश्वनॄणाम् | - | अवलोकयतां सकलानां जन्तुजालानाम्। |
| मतिम् | - | प्रतिभाम् (प्रज्ञाम्)। |
| अहरतम् | - | अपाहरताम्। |

**धातुपदलकाराः**

अहरतम् – हृञ् हरणे इति धातोः परस्मैपदी लङ् मध्यमपुरुषद्विवचनम्।

**भावार्थः**

विस्पष्टदन्तमुकुलौ क्वचित् विहसन्तौ मुखपतितालकौ मनोहरपादयुक्तौ मणिबन्धलग्नकङ्कणौ भवन्तौ सकलजनानां प्रज्ञाम् अहरताम्।

**अनुसरति जनौघे कौतुकव्याकुलाक्षे**
**किमपि कृतनिनादं व्यहसन्तौ द्रवन्तौ।**
**वलितवदनपद्मं पृष्ठतो दत्तदृष्टी**
**किमपि न विदधाते कौतुकं वासुदेव।।**

**विग्रहवाक्यानि**

| | | |
|---|---|---|
| जनौघे | - | जनानम् ओघः, तस्मिन्। |
| कौतुकव्याकुलाक्षे | - | विशेषेण आकुलं व्याकुलं, व्याकुले अक्षिणी यस्य सः व्याकुलाक्षः, कौतुकेन व्याकुलाक्षः,तस्मिन्। |
| वलितवदनपद्मम् | - | वदनमेव पद्मं वदनपद्मं,वलितं वदनपद्मम्। |
| दत्तदृष्टी | - | दत्ता दृष्टिः येभ्यस्तौ। |

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| हे वासुदेव | - | हे कृष्ण ! |
| कौतुकव्याकुलाक्षे | - | कौतुकेन विस्फारितनेत्रे। |
| जनौघे | - | जनसमूहे |
| अनुसरति | - | (युवयोः)अनुसरति सति। |
| किमपि कृतनिनादं व्याहसन्तौ | - | किमपि नादं कृत्वा हसन्तौ। |
| द्रवन्तौ | - | धावन्तौ। |
| वलितवदनपद्मम् | - | पश्चान्मुखः सन्। |
| पृष्ठतः दत्तदृष्टी | - | पृष्ठतो विलोकयन्तौ। |
| किमपि कौतुकं न विदधाते | - | कस्य कस्य मनस्सु आनन्दमनजयताम्। |

**भावार्थः**

हे कृष्ण यदा कौतुकेन विकसितनेत्राः जनाः भवन्तौ अनुसरन्ति तदा मन्दहासेन धावन्तौ तिरश्चीनमुखौ पश्चात् विलोकयन्तौ सकलमानवानाम् आनन्दं प्रदत्तवन्तौ ।



**द्रुतगतिषु पतन्तावुत्थितौ लिप्तपङ्कौ**
**दिवि मुनिभिरपङ्कैः सस्मितं वन्द्यमानौ।**
**द्रुतमथ जननीभ्यां सानुकम्पं गृहीतौ**
**मुहुरपि परिरब्धौ द्राग्युवां चुम्बितौ च।।**

**पदच्छेदः**

| | | | | |
|---|---|---|---|---|
| पतन्तावुत्थितौ | - | पतन्तौ | + | उत्थितौ । |
| मुनिभिरपङ्कै | - | मुनिभिः | + | अपङ्कै । |
| मुहुरपि | - | मुहुः | + | अपि । |

## विग्रहवाक्यम्

| | | |
|---|---|---|
| लिप्तपङ्कौ | - | लिप्तः पङ्कः ययोः तौ। |
| अपङ्कैः | - | न पङ्कः अपङ्कः, तैः। |
| सानुकम्पम् | - | अनुकम्पया सह वर्तते इति। |
| द्रुतगतिषु | - | द्रुता गतिः द्रुतगतिः तासु । |

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| दिवि | - | स्वर्गे। |
| अपङ्कैः मुनिभिः | - | पापरहितैः तापसैः। |
| सस्मितं वन्द्यमानौ | - | मन्दहासपूर्वमाराध्यमानौ। |
| द्रुतगतिषु पतन्तौ | - | वेगेन धावनेषु पतन्तौ। |
| उत्थितौ | - | पुनः उत्थानं कृतवन्तौ। |
| युवाम् | - | भवान् बलरामश्च। |
| अथ | - | अनन्तरम्। |
| जननीभ्यां | - | यशोदारोहिणीभ्याम्। |
| द्रुतं सानुकम्पं गृहीतौ | - | जवात् अनुकम्पया सह गृहीतौ। |
| द्राक् परिरब्धौ | - | सम्पूर्णतया परिष्वज्यमाणौ। |
| मुहुरपि चुम्बितौ च | - | पुनः पुनश्चुम्बितौ च आस्ताम्। |

## भावार्थः

वेगेन सञ्चरणेषु व्रजकर्दमे पतन्तौ दिवि द्रष्टुमागतैः मुनिभिः 'अस्मान् अपङ्कीकर्तुं समर्थावेतौ स्वयमेव लिप्तपङ्कौ अधः पतनसमये यावेवाश्रयाम तावेव स्वयं पतन्तौ' इति विचिन्त्य सस्मितं वन्द्यमानौ तथा यशोदारोहिणीभ्यां परिगृहीतौ परिष्वज्यमाणौ चास्ताम्।



स्नुतकुचभरमङ्के धारयन्ती भवन्तं
तरलमति यशोदा स्तन्यदा धन्यधन्या।
कपटपशुप मध्ये मुग्धहासाङ्कुरं ते
दशनमुकुलहृद्यं वीक्ष्य वक्त्रं जहर्ष।।

## विग्रहवाक्यम्

| | | |
|---|---|---|
| कपटपशुप | - | कपटः च असौ पशुपश्च, तत्सम्बुद्धौ। |
| स्नुतकुचभरम् | - | स्नुतं कुचभरं यस्मिन् तत्। |
| मुग्धहासाङ्कुरम् | - | हासमेव अङ्कुरं, तेन मुग्धम्। |
| दशनमुकुलहृद्यम् | - | दशनमेव मुकुलं, तेन हृद्यम्। |

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| कपटपशुप! | - | हे कपटगोपाल! |
| भवन्तं अङ्के धारयन्ती | - | भवन्तं उत्सङ्गे वहन्ती । |
| स्तन्यदा यशोदा | - | स्तन्यं ददती यशोदा । |
| धन्यधन्या सती | - | अतीवधन्या भूत्वा । |
| स्नुतकुचभरम् | - | प्रस्रवितस्तनोपेतम् । |
| मध्ये मुग्धहासाङ्कुरम् | - | अन्तरा मृदुहसितयुक्तम्। |
| दशनमुकुलहृद्यम् | - | दन्तकुड्मलैः हृदयावर्जकम्। |
| ते वक्त्रम् | - | तव मुखम्। |
| वीक्ष्य | - | अवलोक्य। |
| तरलमतिजहर्ष | - | अतितरलं तुतोष। |

## भावार्थः

हे कपटगोपाल! स्तन्यं पिबन्तं मध्ये मध्ये दन्तमुकुलान् प्रदर्श्य ईषद्धसन्तं भवन्तम् अङ्के धारयन्ती लोलायमानहृदया यशोदा अतिधन्यत्वं प्राप्य त्वन्मुखं वीक्ष्य सन्तुष्टाऽभूत्।

तदनु चरणचारी दारकैः साकमारा-
न्निलयततिषु खेलन्बालचापल्यशाली।
भवनशुकबिडालान् वत्सकांश्चानुधावन्
कथमपि कृतहासैः गोपकैर्वारितोऽभूः।।

## पदच्छेदः

| | | | |
|---|---|---|---|
| साकमारान्निलयततिषु | - | साकमारात् + | निलयततिषु । |
| वत्सकांश्चानुधावन् | - | वत्सकान् + | च + अनुधावन्। |
| गोपकैर्वारितोऽभूः | - | गोपकैः + | वारितः + अभूः। |

## विग्रहवाक्यम्

| | | |
|---|---|---|
| चरणचारी | - | चरणाभ्यां चरितुं शीलमस्येति। |
| निलयततिषु | - | निलयानां ततिः , तेषु। |
| चापल्यम् | - | चपलस्य भावः कर्म वा। |
| कृतहासैः | - | कृतं हासं यैः तैः। |

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| तदनु चरणचारी | - | तदनन्तरं पादचारी (त्वम्)। |
| आरात् | - | समीपस्थेषु। |
| निलयततिषु | - | भवनसमूहेषु। |
| दारकैः साकं खेलन् | - | बालकैः सह क्रीडन्। |
| बालचापल्यशाली | - | बालचपलस्वभावः सन्। |
| भवनशुकबिडालान् | - | गृहे परिपोष्यमाणान् शुकबिडालान्। |
| वत्सकांश्चानुधावन् | - | गोपोतकांश्चानुगच्छन्। |
| कृतहासैः गोपकैः | - | कृतहासैः गोपबालकैः। |
| कथमपि वारितोऽभूः | - | येन केन प्रकारेण निवारितो बभूविथ। |

**भावार्थः**

पादचारी त्वं निकटस्थनिलयान् प्राप्य तत्र तत्र खेलन् तथा गृहशुकबिडालान् अनुधावन् गोपोतकान् च कृतहासैःव्रजवासिभिः बालकैः कथमपि निवारितोऽभूः।

**हलधरसहितस्त्वं यत्र यत्रोऽपयातो**
**विवशपतितनेत्रास्तत्र तत्रैव गोप्यः।**
**विगलितगृहकृत्या विस्मृतापत्यभृत्याः**
**मुरहर मुहुरत्यन्ताकुलाः नित्यमासन्।।**

**पदच्छेदः**

| | | | |
|---|---|---|---|
| हलधरसहितस्त्वम् - | - | हलधरसहितः | + त्वम्। |
| यत्रोपयातः | - | यत्र | + उपयातः। |
| तत्रैव | - | तत्र | + एव। |
| विवशपतितनेत्रास्तत्र | - | विवशपतितनेत्राः | + तत्र। |

**विग्रहवाक्यम्**

| | | |
|---|---|---|
| विगलितगृहकृत्या | - | गृहसम्बन्धि कृत्यं गृहकृत्यं, विगलितानि गृहकृत्यानि याभिः ताः |
| विवशपतितनेत्राः | - | वैवश्येन पतिते नेत्रे यासां ताः। |
| विस्मृतापत्यभृत्याः | - | अपत्यानि भृत्याश्च अपत्यभृत्याः, विस्मृताः अपत्यभृत्याः याभिः ताः। |
| मुरहर | - | मुरम् अहरत् इति मुरहरः, तत्सम्बुद्धौ। |

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| मुरहर | - | हे मुरारे |
| हलधरसहितः त्वम् | - | बलभद्रयुक्तः भवान्। |
| यत्र यत्र उपयातः | - | यत्र यत्र प्राप्तः। |
| तत्र तत्रैव | - | तत्र तत्र स्थले। |
| विगलितगृहकृत्याः | - | त्यक्तस्वगृहकृत्याः। |

| | | |
|---|---|---|
| विस्मृतापत्यभृत्याः | - | स्वसन्तानानि भृत्यांश्च विस्मृत्य वर्तमानाः। |
| नित्यम् | - | अनवरतम्। |
| मुहुः | - | पुनः। |
| अत्यन्ताकुलाः | - | अतीव व्याकुलचित्ताः। |
| आसन् | - | अभवन्। |

भावार्थः

हे मुरारे! भवान् बलरामेण सह गोकुले यत्र यत्र विचचार गोपीजनाः स्वगृहकृत्येभ्यो विरताः स्वपुत्रभृत्यान् विस्मृत्य भवल्लीलतया भवद्दर्शनोत्सुकाः तत्र तत्र अवर्तन्त।

**प्रतिनवनवनीतं गोपिकादत्तमिच्छन्**
**कलपदमुपगायन् कोमलं क्वापि नृत्यन्।**
**सदययुवतिलोकैरर्पितं सर्पिरश्नन्**
**क्वचन नवविपक्वं दुग्धमप्यापिबस्त्वम्।।**

**पदच्छेदः**

| | | | | |
|---|---|---|---|---|
| क्वापि | - | क्व | + | अपि । |
| सदययुवतिलोकैरर्पितम् | - | सदययुवतिलोकैः | + | अर्पितम् । |
| सर्पिरश्नन् | - | सर्पिः | + | अश्नन् । |
| दुग्धमप्यापिबस्त्वम् | - | दुग्धम् अपि | + | आपिबः + त्वम् । |

**विग्रहः**

| | | |
|---|---|---|
| गोपिकादत्तम् | - | गोपिकाभिः दत्तम् । |
| कलपदम् | - | कलम् च तत्पदं च । |
| नवविपक्वम् | - | विशेषेण पक्वम् विपक्वम्, नवं च तत् विपक्वं च । |
| सदययुवतिलोकैः | - | दयया सह वर्तन्ते इति सदयाः, ताः एव युवतयः सदयुवतयः, तस्यां लोकैः। |

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| त्वम् | - | भवान् |
| प्रतिनवनवनीतम् | - | अत्यन्तम् नवं हैयङ्गवीनम् |
| इच्छन् | - | अभिलषन् |
| कलपदम् उपगायन् | - | अव्यक्तमधुराणि गीतानि गायन् |
| क्वापि कोमलं नृत्यन् | - | कुत्रापि मनोहरं नर्तनं कुर्वन् |
| क्वचन | - | कुत्रचित् |
| सदययुवतिलोकैः | - | दयार्द्रहृदयैः गोपिकायुवतिभिः |
| अर्पितम् | - | समर्पितम् |
| सर्पिः अश्नन् | - | घृतम् भक्षयन् |
| नवविपक्वम् | - | तदानीमेव पक्वं |
| दुग्धम् अपि | - | क्षीरम् अपि |
| आपिबः | - | पीतवान्। |

**भावार्थः**

हे भगवन्! भवान् गोकुलमधिवसन् गोपिकाहस्तेभ्यो नवनीतस्पृहालुस्सन् मधुरं गानमालपन् कदाचित् तत्र नृत्यन् कुत्रचित् गोपिकाभिः दत्तं धृतं भक्षयन् सुपक्वं क्षीरञ्च पिबन्नवर्त्तत।

**मम खलु बलिगेहे याचनं जातमास्ता-**
**मिह पुनरबलानामग्रतो नैव कुर्वे।**
**इति विहितमतिः किं देव!संन्त्यज्य याच्ञां**
**दधिघृतमहरस्त्वं चारुणा चोरणेन।।**

**पदच्छेदः**

| | | | | | | |
|---|---|---|---|---|---|---|
| पुनरबलानाम् | - | पुनः | + | अबलानाम् | | |
| अग्रतो नैव | - | अग्रतः | + | न | + | एव |
| अहरस्त्वम् | - | अहरः | + | त्वम् | | |

**विग्रहः**

विहितमतिः - विहिता मतिः येन सः ।

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| मम | - | (अत्र) वासुदेवस्य। |
| बलिगेहे | - | महाबलिगृहे (पुरा)। |
| याचनम् | - | अर्थनम्। |
| जातम् | - | संभूतम्। |
| आस्ताम् | - | एतत्कार्यमत्र अस्तु। |
| इह | - | व्रजे(अधुना) |
| पुनः | - | अतः परम् । |
| अबलानाम् | - | गोपयुवतीनाम् |
| अग्रतः | - | पुरतः |
| नैव | - | न हि |
| कुर्वे | - | (याचनम्) करिष्यामि। |
| इति | - | इत्यतः |
| विहितमतिः | - | कृतधीः |
| हे देव ! | - | हे बालकृष्ण! |
| त्वं | - | (त्वं) भवान् |
| याच्ञां | - | याचनाम्। |
| सन्त्यज्य | - | विहाय। |
| चारुणा | - | हृदयावर्जकेन। |
| चोरणेन | - | अपहरणेन |
| दधिधृतम् | - | नवनीतादिपयस्यम्। |
| अहरः | - | अपहरणं कृतवानसि । |

**भावार्थः**

हे भगवन्! पुरा महाबलेः भूमिं भवान् अयाचत, तदास्ताम् । अत्र पुनः अबलानां पुरतः याचनां न करोमीति निश्चित्य भवान् गोपिकाभवनेभ्यो दधिं घृतञ्च अचूचुरत् किम्?

आस्ताम् इति **भवतु नाम** इत्यर्थे अव्ययम्।

**तव दधिघृतमोषे घोषयोषाजनाना-**
**मभजत हृदि रोषो नावकाशं न शोकः।**
**हृदयमपि मुषित्वा हर्षसिन्धौ न्यधास्त्वं**
**स मम शमय रोगान् वातगेहाधिनाथ।।**

**पदच्छेदः**

| | | | | |
|---|---|---|---|---|
| न्यधास्त्वं | - | न्यधाः | + | त्वम्। |

**विग्रहवाक्यम्**

| | | |
|---|---|---|
| हर्षसिन्धौ | - | हर्ष एव सिन्धुः, तस्मिन्। |
| वातगेहाधिनाथ | - | नाथे इति अधिनाथः, वातगेहस्य अधिनाथः, तत्सम्बुद्धौ। |

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| तव दधिघृतमोषे | - | भवतः दधिघृतादिचोरणे। |
| घोषयोषाजनानाम् | - | गोपिकाजनानाम्। |
| हृदि रोषो न | - | चित्ते कोपः न हि। |
| अवकाशम् अभजत | - | स्थानम् आवहत्। |
| न शोकः | - | दुःखोऽपि न। |
| हृदयमपि मुषित्वा | - | चित्तं च चोरयित्वा। |
| हर्षसिन्धौ न्यधा | - | आनन्दाब्धौ चिक्षेपिथाः। |
| वातगेहाधिनाथ | - | गुरुपवनपुरेश! |
| स त्वं | - | तादृशः त्वम्। |
| मम रोगान् | - | मम आमयान्। |
| शमय | - | दूरीकुरु। |

**भावार्थः**

भवतः नवनीतादिमोषणेन गोपिकानां मनसि शोकः कोपो वा नाजायत, यतोहि भवान् तासां हृदयमपि चोरयित्वा ताः आनन्दाब्धौ स्नापयति स्म। तादृश पवनपुरेश मम रोगान्निवारय।

## पठनप्रवर्तनानि

**पद्यं सतालं कक्ष्यायामालपतु।**

**श्रद्धेयाः अंशाः**

अक्षरस्फुटता
अर्थव्यक्तता
तालानुसृतं आलपनपाटवम्।

**श्रीकृष्णस्य बाललीलाः अधिकृत्य लघूपन्यासं रचयतु।**

**श्रद्धेयाः अंशाः**

संघे चर्चा
आशयरूपीकरणम्
उपन्यासरचना

**प्रायः आधुनिकसमाजे किशोराः नैसर्गिकेभ्यः केलिभ्यः विमुखाः भवन्ति। विषयमिममधिकृत्य संवादं प्रचाल्य टिप्पणीं लिखतु।**

**श्रद्धेयाः अंशाः**

आशयस्वांशीकरणम्
अवतारणम्
सयुक्तिकम् आशयसमर्थनम्
इतरमतखण्डनम्

**पाठभागात् पाठान्तरेभ्यश्च क्त्वान्त-ल्यबन्त-तुमुन्नन्तरूपाणि चित्वा पट्टिकां लिखतु।**

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|
| | | |

## श्लोकानां गद्यक्रमं लिखतु।

### श्रद्धेयाः अंशाः

अर्थावगमनम् ।
गद्यक्रमीकरणसामर्थ्यम् ।
वाक्यशुद्धिः ।

## अधोदत्तानां धातूनां शत्रन्तरूपाणि लिखतु।

### श्रद्धेयाः अंशाः

भाषाज्ञानम्।
उचितपदप्रयोगः ।
रूपनिष्पत्तिज्ञानम्।

| धातुः | पुल्लिंगः | स्त्रीलिंगः |
|---|---|---|
| गै | गायन् | गायन्ती |
| नृ | | |
| गम् | | |
| पठ् | | |
| खाद् | | |
| क्रीड् | | |
| वह् | | |
| ज्ञा | | |

## पाठः - २

# समागमः

**आमुखम्**

भासमहाकविना विरचितेषु रूपकेषु अन्यतमः भवति मध्यमव्यायोगः। पाण्डवमध्यमेन भीमसेनेन कृतं साधुजनरक्षणं, तथा घटोत्कचेन हिडिम्बया च साकं पुनस्समागमः च अस्मिन् व्यायोगे वर्णितः।

केशवदासो नाम ब्राह्मणः त्रिभिः पुत्रैः पत्न्या च समं वनमार्गेण गच्छन्नासीत्। मातुराहारार्थं मानुषमन्विष्य आगतः घटोत्कचः सकुटुम्बस्य तस्य भीतिम् अजनयत् । ब्राह्मणस्य मध्यमपुत्रः स्वकुटुम्बस्य रक्षणार्थं तेन सह गन्तुं सन्नद्धः अभवत्। तन्निवार्य भीमसेन एव स्वयं गत्वा स्वप्रियया पुत्रेण च युक्तो भवति इति कथासन्दर्भः।

(ततः प्रविशति भीमसेनः)

(मध्यम इति सम्बोधनशब्दश्रवणादात्मानमेव केनापि आहूयमानं मन्यमानस्य भीमसेनस्य प्रवेशः)

भीमसेनः - भो ! कस्यायं स्वरः?

खगशतविरुते विरौति तारं द्रुमगहने दृढसङ्कटे वनेऽस्मिन् ।
जनयति च मनोज्वरं स्वरोऽयं बहुसदृशो हि धनञ्जयस्वरस्य ।। (१)

घटोत्कचः - चिरायते खलु ब्राह्मणवटुः। अतिक्रामति मातुराहारकालः। किन्नु खलु करिष्ये? भवतु दृष्टम्। उच्चैः शब्दापयामि। भोः भोः मध्यम! शीघ्रमागच्छ।

---

**पदच्छेदः -** *कस्यायम् - कस्य + अयम्, स्वरोऽयम् - स्वरः + अयम्, वनेऽस्मिन् - वने + अस्मिन्, किन्नु -किम् + नु*

**पदार्थः -** *विरौति = शब्दं करोति , तारम् = अत्युच्चम्, दृढसङ्कटे = दुष्प्रवेशे, चिरायते = विलम्बते ।*

**अन्वयः -** *खगशतविरुते द्रुमगहने दृढसङ्कटे तारं विरौति । अयं स्वरः धनञ्जयस्वरस्य बहुसदृशः मनोज्वरं जनयति च ।*

**अन्वयार्थः -** *खगशतविरुते ( अनेकपक्षिणां शब्दैः मुखरिते) वृक्षसङ्कुले दुष्प्रवेशे अत्युच्चं शब्दं करोति । अर्जुनस्य शब्दस्य अत्यन्तसदृशः। अतः मनोव्यथाम् उत्पादयति।*

भीमसेनः - भोः ! को नु खल्वेतस्मिन् वनान्तरे मम व्यायामविघ्नमुत्पाद्य मध्यम मध्यम इति मां शब्दापयति । भवतु पश्यामः तावत् ।

(परिक्रम्यावलोक्य)

अहो दर्शनीयोऽयं पुरुषः. अयं हि

सिंहास्यः सिंहदंष्ट्रो मधुनिभनयनः स्निग्धगम्भीरकण्ठो
बभ्रूभ्रूः श्येननासो द्विरदपतिहनुर्दीर्घविश्लिष्टकेशः।
व्यूढोराः वज्रमध्यो गजवृषभगतिर्लम्बपीनांसबाहुः
सुव्यक्तं राक्षसीजो विपुलबलयुतो लोकवीरस्य पुत्रः।। (२)

घटोत्कचः - चिरायते खलु ब्राह्मणवटुः । अतिक्रामति मातुराहारकालः। किमिदानीं करिष्ये? भवतु,

उच्चैराह्वानं करिष्ये। भो भो मध्यम शीघ्रमागच्छ।

भीमसेनः - भोः प्राप्तोऽस्मि ।

---

**पदच्छेदः -** *खल्वेतस्मिन् - खलु + एतस्मिन् , द्विरदपतिहनुर्दीर्घः - द्विरदपतिहनुः + दीर्घः, वृषभगतिर्लम्बपीनांसबाहुः - वृषभगतिः + लम्बपीनांसबाहुः, उच्चैराह्वानम् - उच्चैः +आह्वानम् ।*

**अन्वयः -** *मधुनिभनयनः सिंहास्यः सिंहदंष्ट्रः स्निग्धगंभीरकण्ठः बभ्रू भ्रूः श्येननासः द्विरदपतिहनुः दीर्घविश्लिष्टकेशः व्यूढोराः वज्रमध्यः गजवृषभगतिः लम्बपीनांसबाहुः राक्षसीजः विपुलबलयुतः लोकवीरस्य पुत्रः भवेत्।*

**अन्वयार्थः -** *मकरन्दसवर्णनयनः, सिंहवदनः, सिंहसमानदंष्ट्रः, स्नेहमयगंभीरस्वरः, पिङ्गलभ्रूः, गरुडस्येव नासायुक्तः, गजराजसमानहनुः, लम्बमानविशीर्णकेशः, विशालवक्षः, कठिनमध्यः, गजश्रेष्ठगतिः, लम्बमानस्थूलांसो पृथुस्कन्धः च , राक्षसीपुत्रः , अतीव बलशाली लोकेषु वीरस्य पुत्रः। (अयं स्यादिति अनुमानम्)*

**पदार्थः -** *हनुः - मुखावयवम्, कपोलास्थिद्वयम् ।*

घटोत्कचः - न खल्वयं ब्राह्मणवटुः। अहो दर्शनीयोऽयं पुरुषः । यः एषः -

सिंहाकृतिः कनकतालसमानबाहुर्मध्ये तनुर्गरुडपक्षविलिप्तपक्षः।
विष्णुर्भवेद्विकसिताम्बुजपत्रनेत्रो नेत्रे ममाहारति बन्धुरिवागतोऽयम्। (३)

भो मध्यम, त्वां खल्वहं शब्दापयामि ।

भीमसेनः - अतः खल्वहं प्राप्तः।

घटोत्कचः - किं भवानपि मध्यमः?

भीमसेनः - न तावदपरः।

मध्यमोऽहमवध्यानामुत्सिक्तानां च मध्यमः।
मध्यमोऽहं क्षितेर्भद्र भ्रातॄणामपि मध्यमः ।। (४)

घटोत्कचः - भवितव्यम्।

भीमसेनः - अपि च।

मध्यमः पञ्चभूतानां पार्थिवानां च मध्यमः।
भवे च मध्यमो लोके सर्वकार्येषु मध्यमः।। (५)

---

**पदच्छेदः -** *बाहुर्मध्ये - बाहुः + मध्ये, तनुर्गरुडपक्षः - तनुः + गरुडपक्षः , विष्णुर्भवेत् -विष्णुः + भवेत्, ममाहरति - मम + आहरति, आगतोऽयम् - आगतः + अयम्, खल्वयम् - खलु + अयम्, उच्चैराह्वानम् - उच्चैः + अह्वानम्, मध्यमोऽहम् - मध्यमः + अहम्, क्षितेर्भद्र - क्षितेः + भद्र।*

**पदार्थः -** *दर्शनीयः = सुन्दरः, वटुः - ब्रह्मचारी।*

**अन्वयः -** सिंहाकृतिः, कनकतालसमानबाहुः, मध्ये तनुः, गरुडपक्षविलिप्तपक्षः, विकसितांबुजपत्रनेत्रः अयं विष्णुः आगतः भवेत् बन्धुरिव मम नेत्रे आहरति।

भद्र! अहम् अवध्यानां मध्यमः। उत्सिक्तानां च मध्यमः । क्षितेः मध्यमोऽहम् । भ्रातॄणामपि मध्यमः। पञ्चभूतेषु मध्यमः। पार्थिवानां च मध्यमः । भवेत् च मध्यमो लोके सर्वकार्येषु मध्यमः।

**अन्वयार्थः -** सिंहरूपः, सुवर्णसालवृक्षसमानः, कृशमध्यः, गरुडपक्षाविव विशालपार्श्वः, विकसितकमलनयनः, अयं विष्णुः भवेत् । आगतोऽयं बन्धुः इव मम नेत्रे आकर्षति। भद्र! अवध्यानां मध्ये मध्यमोऽहम्, शौर्ययुक्तानां मध्येऽपि मध्यमः। भूमेः मध्यमलोकत्वात् अहं (भीमः) मध्यमः। सोदराणां मध्येऽपि मध्यमः, (कौन्तेयेषु प्रथमः युधिष्टिरः तृतीयः अर्जुनः। मध्यमः भीमश्चाहं भूलोकवासी इत्यतः अपि मध्यमः, यतः भूस्वर्गपातालानां मध्ये भूमिः मध्यमा । ) पञ्चभूतेष्वपि मध्यमः भवति, यतः "भूरम्भस्सनिलानलाम्बरः" इत्युक्तेः । जनानां सर्वकार्येषु सर्वदा मध्यस्थो भवामि इत्यतः तत्रापि मध्यमः। एवम् अष्टभिः प्रकारैः भीमसेनस्य मध्यमत्वमुपपादितम्।

वृद्धः - मृत्योः दर्पाद् अस्मान् मोक्तुम् इह आगतः पाण्डवमध्यमः भीमः एव नूनम्।

घटोत्कचः - प्राप्तवानिदानीं खल्वसि। मध्यम, मध्यम इति इतः।

वृद्धः - (भीममुपगम्य) भो मध्यम, परित्रायस्व ब्राह्मणकुलम्।

भीमसेनः - न भेतव्यं न भेतव्यम् । मध्यमोऽहमभिवादये।

वृद्धः - वायुरिव दीर्घायुर्भव ।

भीमसेनः - अनुगृहीतोऽस्मि। कुतो भयमार्यस्य?

वृद्धः - श्रूयताम् - अहं केशवदासो नाम ब्राह्मणः। मातुलपुत्रस्योपनयनानुभवार्थं सकलत्रपुत्रः प्रस्थितोऽस्मि।

भीमसेनः - अरिष्टोऽस्तु पन्थाः। ततस्ततः?

वृद्धः - ततो मामेष राक्षसः हन्तुकामः अभ्युपैति।

भीमसेनः - एवम् । अनेन ब्राह्मणजनस्य मार्गविघ्नः कृतः। भवतु निग्रहिष्यामि तावदेनम्। भो ! पुरुष ! तिष्ठ तिष्ठ!

घटोत्कचः - एष स्थितोऽस्मि।

भीमसेनः - किमर्थं ब्राह्मणजनमपराध्यसि? सर्वापराधे अवध्यत्वाद् सदारस्तनयैः सह अयं द्विजसत्तमः मुच्यताम्।

घटोत्कचः - न मुच्यते ।

भीमसेनः - (आत्मगतम्) भोः कस्य पुत्रेणानेन भवितव्यम् ?

भ्रातॄणां मम सर्वेषां कोऽयं भोः गुणतस्करः ।
दृष्ट्वैतद्बालशौण्डीर्यं सौभद्रस्य स्मराम्यहम्।। (६)

---

**पदच्छेदः** - *वायुरिव - वायुः + इव , अनुगृहीतोऽस्मि - अनुगृहीतः + अस्मि , ततस्ततः - ततः + ततः, पुत्रेणानेन - पुत्रेण + अनेन , कोऽयम् - कः + अयम्, स्मराम्यहम् - स्मरामि + अहम्।*

**पदार्थः** - *शब्दापयामि = आह्वयामि, परित्रायस्व = रक्षतु, अरिष्टः = निरुपद्रवः, गुणतस्करः = गुणानुकार।*

**अन्वयः** - भोः ! मम सर्वेषां भ्रातॄणां गुणतस्करः अयं कः ? एतत् बालशौण्डीर्यं दृष्ट्वा अहं सौभद्रस्य स्मरामि ।

**अन्वयार्थः** - मम सर्वेषां सोदराणां गुणापहर्ता सः कः भवेत् ? तस्य बालस्य शौर्यगर्वादिकं दृष्ट्वा अभिमन्युं (सौभद्रं) स्मरामि।

(प्रकाशम्) भो पुरुष ! मुच्यताम् ।

घटोत्कचः - न मुच्यते ।

मुच्यतामिति विस्रब्धं ब्रवीति यदि मे पिता ।
न मुच्यते तथाह्येष गृहीतो मातुराज्ञया ।। (७)

भीमसेनः - (आत्मगतम्) कथं मातुराज्ञेति ।

अहो गुरुशुश्रूषुः खल्वयं तपस्वी।

माता किल मनुष्याणां दैवतानां च दैवतम्।
मातुराज्ञां पुरस्कृत्य वयमेतां दशां गताः।। (८)

(प्रकाशम्) भो पुरुष ! प्रष्टव्यं खलु तावदस्ति।

घटोत्कचः - ब्रूहि ब्रूहि शीघ्रम् ।

भीमसेनः - का नाम भवतो माता?

---

**पदच्छेदः** - *तथा ह्येष - तथा + हि + एष, मातुराज्ञया मातुः + आज्ञया, सदृशो ह्यस्य - सदृशः + हि + अस्य। खल्वयं - खलु + अयम्।*

**पदार्थः** - *तपस्वी = धार्मिकः, गुरुशुश्रूषुः = मातृपरिचरणतत्परः।*

**अन्वयः** - मुच्यताम् इति विस्रब्धं यदि मे पिता ब्रवीति तथा न मुच्यते ,हि एष मातुराज्ञया गृहीतः। मनुष्याणां दैवतानां च दैवतं माता किल मातुः आज्ञां पुरस्कृत्य वयमेतां दशां गताः।।

**अन्वयार्थः** - मोचयतु इति स्नेहपूर्वं मम पिता ब्रवीति चेदपि न मुच्यते। यतः मातुरादेशेन गृहीतः एषः। मातुरुपदेशेन बन्धितम् अमुं न मोचयामि। पितरमपेक्ष्य माता श्रेष्ठा इति व्यज्यते।

मानवानां देवानां च देवता माता खलु। पूज्यानामपि मध्ये प्रथमा सा इति भावः । मातुः उपदेशान् स्वीकृत्य वयं पाण्डवाः लोके इमामवस्थां प्राप्ताः।



घटोत्कचः - श्रूयताम् हिडिम्बा नाम राक्षसी ।

भीमः - (सहर्षमात्मगतम्) एवं हिडम्बायाः पुत्रोऽयम्?
सदृशोऽह्यस्य गर्वः । (प्रकाशम्) भो पुरुष! मुच्यताम्।

घटोत्कचः - न मुच्यते ।

भीमसेनः - भोः ब्राह्मण! गृह्यतां तव पुत्रः । वयमेनमनुगमिष्यामः।

द्वितीयः - मा मा भवानेवम् ।

भीमसेनः - आर्य! मा मैवम् । क्षत्रियकुलोत्पन्नोऽहम् । पूज्यतमाः खलु ब्राह्मणाः। तस्मान्मच्छरीरेण ब्राह्मणशरीरं विनिमातुमिच्छामि।

घटोत्कचः - एवं क्षत्रियोऽयं, तेनास्य दर्पः। भवतु इममेव हत्वा नेष्यामि। अथ केनायं वारितः ?

भीमः - मया ।

घटोत्कचः - किं त्वया ?

भीमसेनः - अथ किम् ?

घटोत्कचः - तेन हि भवानेवागच्छतु ।

---

**पदच्छेदः-** *मैवम् - मा + एवम्, तेनास्य - तेन + अस्य । तस्मान्मच्छरीरेण - तस्मात् + मत् + शरीरेण ।*

**पदार्थः -** *विनिमातुं = विनिमयं कर्तुम् ।* -

भीमसेनः - एवम्, अतिवीर्यबलं नानुगच्छामि। यदि ते शक्तिरस्ति बालात्कारेण मां नय।

(उभौ परिक्रामतः)

घटोत्कचः - इह तिष्ठ! त्वदागमनम् अम्बायै निवेदयामि ।

भीमसेनः - बाढम् । गच्छ।

घटोत्कचः - (उपसृत्य) अम्ब, अभिवादये, घटोत्कचोऽहम् । चिराभिलषितो भवत्या आहारार्थमानीतो मनुष्यः।

(प्रविश्य)

हिडिम्बा - जात चिरं जीव । कीदृशो मानुषः आनीतः ?

घटोत्कचः - भवति ! वाङ्मात्रेण मानुषो न वीर्येण ।

(उभौ परिक्रामतः)

हिडिम्बा - किमेष मानुष आनीत?

घटोत्कचः - भवति, कोऽयम् ?

हिडिम्बा - उन्मत्तक, दैवतं खल्वयम्।

घटोत्कचः - आः कस्य दैवतम् ?

हिडिम्बा - तव च मम च । (उपसृत्य) जयत्वार्यपुत्र !

भीमसेनः - (विलोक्य) अये देवी हिडिम्बा ।

हिडिम्बा - उन्मात्तक! अभिवादय पितरम्।

घटोत्कचः - भोस्तात, पुत्रचापलं क्षन्तुमर्हसि ।

भीमसेनः - एह्येहि पुत्र, अतिबलपराक्रामी भव।

घटोत्कचः - अनुगृहीतोऽस्मि।

---

**पदच्छेदः -** *शक्तिरस्ति - शक्तिः + अस्ति, वाङ्मात्रेण - वाक् + मात्रेण , भोस्तात - भोः + तात, एह्येहि - एहि + एहि, । जयत्वार्यपुत्रः - जयतु + आर्यपुत्रः ।*

**पदार्थः -** *परिक्रामति = परिभ्रमति, वाङ्मात्रेण = वचनमात्रेण, उन्मत्तकः = भ्रान्तचित्तः, ।*

❊❊❊ ❊❊❊

## विग्रहवाक्यानि -

| | | |
|---|---|---|
| स्निग्धगम्भीरकण्ठः | - | स्निग्धः गम्भीरः च कण्ठः यस्य सः। (कण्ठः कण्ठध्वनिः।) |
| द्विरदपतिहनुः | - | द्विरदपतेः इव हनू यस्य तादृशः। |
| दीर्घविश्लिष्टकेशः | - | दीर्घाः विश्लिष्टाः च केशाः यस्य सः। |
| व्यूढोराः | - | व्यूढः उरः यस्य सः । |
| वज्रमध्यः | - | वज्रस्येव मध्यं यस्य सः । |
| लम्बपीनांसबाहुः | - | लम्बौ पीनांसौ च बाहू यस्य सः। |
| गरुडपक्षविलिप्तपक्षः | - | गरुडपक्षाविव विलिप्तौ पक्षौ यस्य सः। |
| विकसिताम्बुजपत्रनेत्रः | - | विकसिते अम्बुजपत्रे इव नेत्रे यस्य सः। |
| पद्मपत्रायताक्षः | - | पद्मस्य पत्रमिव आयते अक्षिणी यस्य सः। |
| मृगपतिगतिः | - | मृगपतेः गतिः इव गतिः यस्य सः। |
| हन्तुकामः | - | हन्तुं कामं यस्य सः। |
| प्रोग्रदंष्ट्रः | - | प्रकर्षेण उग्रे दंष्ट्रे यस्य सः । |
| बालशौण्डीर्यम् | - | बालस्य शौण्डीर्यम् । |
| सौभद्रस्य | - | सुभद्रायाः अपत्यं पुमान् सौभद्रः तस्य। |
| सकलत्रपुत्रः | - | कलत्रेण पुत्रैः च सहितः। |

## श्रद्धेयौ अंशौ

स्वरभेदाः - मन्द्रं , मध्यम् , तारम् इति स्वरस्य त्रयः भेदाः सन्ति ।

हन्तुकामः -तुम्काममनसोरपि इति तुमुनो मकारस्य लोपः ।

## पठनप्रवर्तनानि

**व्यायोगे प्रयुक्तानि संम्बोधनरूपाणि विविच्य लिखतु ।**

**श्रद्धेयौ अंशौ**

विवेचनसामर्थ्यम् ।
सम्बोधनापदपरिचयः ।

**नाटकस्थकथापात्राणां भागं गृहीत्वा कक्ष्यायमवतारयतु।**

**श्रद्धेयाः अंशाः**

आशयावगमनम् ।
अभिनयचातुर्यम्।
अवतारणम् ।

**व्यायोगं सम्यक् पठित्वा आशयं कथारूपेण लिखतु।**

**श्रद्धेयाः अंशाः**

आशयावगमनम्।

उचिता शैली ।

भाषायाः औचित्यम्।

**प्रदत्तानां कथापात्राणां स्वभावं निरूप्य टिप्पणीं लिखतु।**

**(क) घटोत्कचः। (ख) हिडिम्बा। (ग) भीमसेनः।**

**श्रद्धेयाः अंशाः**

आशयावगमनम्।

लेखननैपुणी ।

उचिता वाक्यघटना ।

## अधिकवाचनांशः

'ब्रवीतु'- ब्रूञ् व्यक्तायां वाचि लोट् परस्मैपदि ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र-पु | ब्रवीतु,ब्रूतात् | ब्रूताम् | ब्रुवन्तु |
| म-पु | ब्रूहि ,ब्रूतात् | ब्रूतम् | ब्रूत |
| उ-पु | ब्रुवाणि | ब्रुव | ब्रुवाम। |

'विरौति'- वि पूर्वक रु शब्दे धातु लट् परस्मैपदि ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र-पु | रौति ,रवीति | रुतः,रुवीतः | रुदन्ति |
| म-पु | रौषि | रुथः | रुथ |
| उ-पु | रौमि | रुवः | रुमः । |

‘मुच्यते’- मुच्लृ मोचने धातु उभयपदि कर्मणि लट् ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र-पु | मुच्यते | मुच्येते | मुच्यन्ते |
| म-पु | मुच्यसे | मुच्येथे | मुच्यध्वे |
| उ-पु | मुच्ये | मुच्यावहे | मुच्यामहे |

नान्दी -

आशीर्वचनसंयुक्ता नित्यं यस्मात्प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति कीर्तिता।।

सूत्रधारः -

आसूत्रयन् गुणान् नेतुः कवेरपि च वस्तुनः।
रङ्गप्रसाधनप्रौढः सूत्रधार इहोच्यते।।

प्रकाशं स्वगतं च (आत्मगतम्) -

सर्वश्राव्यं प्रकाशं स्यात्।
आश्राव्यं स्वगतं मतम्।।

## पाठः - ३

# ।। परधर्मोभयावहः ।।

आमुखम्

नारयणपण्डितेन विरचितः हितोपदेशः संस्कृतसाहित्ये प्रसिद्धोऽस्ति। कस्यचित् राज्ञः अनभिज्ञान् पुत्रान् उद्बोधयितुं सद्गुणसम्पन्नान् च कर्तुं विरचिते अस्मिन् कथाग्रन्थे पक्षिमृगादयः कथापात्रत्वेन वर्णिताः। हितोपदेशात् उद्धृता काचित् कथा अत्र दीयते।



वारणस्यां नगर्यां वसन्तको नाम रजकः निवसति स्म। युवकः सः समीपग्रामवासिनः अपरस्य रजकस्य पुत्रीं परिणीतवान् । विवाहसमये वधूगृहात् बहूनि द्रव्याणि प्राप्तानि। एतद् ज्ञात्वा केचन चोराः तस्य गृहे प्रविष्टवन्तः । रजकस्य गृहे एकः गर्दभः, एकः शुनकः च आस्ताम्। गर्दभः अङ्कणे रज्वा बद्धः आसीत्। किन्तु शुनकः गृहपरिसरे सदा परिभ्रमन् आसीत् । गृहं प्रविष्टान् चोरान् दृष्ट्वा गर्दभः शुनकम् अवदत्। सखे ! उच्चैः शब्दं कुरु। चोराः गृहं प्रविशन्ति इति स्वामिनं सूचयतु। वस्तुतः एतत् कार्यं भवता करणीयमस्ति।

गर्दभस्य वचनं श्रुत्वा ईषत् हसित्वा शुनकः अवदत् – भ्रातः ! मम कर्तव्यमधिकृत्य भवता चर्चा न करणीया। इदानीम् अस्माकं स्वामी मयि पूर्ववत् न स्निह्यति इति भवान् जानाति वा ? अहम् अहर्निशं तस्य गृहस्य सुरक्षां विदधामि। किन्तु सः इदानीं सम्यगाहारमपि मह्यं न ददाति । हे मित्र! अतः स्वकर्तव्यम् अहं सम्यक् जानामि। अत्र त्वं किमपि वक्तुं नार्हसि ।

शुनकस्य धाष्ट्र्यं श्रुत्वा स्वामिभक्तः गर्दभः पुनरप्यवदत् - अरे मूढ ! श्रुणु। यः कार्यकाले स्वार्थाय तिष्ठति सः कुत्सितः भृत्यः, निन्दनीयं मित्रं भवति। अतः इदानीं स्वकर्तव्यमाचर। अनन्तरं स्वामिनं स्वकीये विषये बोधयिष्यावः इति।

गर्दभस्य वचनेन शुनकः रुष्टः अभवत्। सः गर्दभम् अवदत् - रे मूढ! किमेवं मामुपदिशसि ? स्वामिभक्तश्चेत् किमर्थं स्वामिनं न बोधयसि ? यः स्वामी भृत्यान् यथाशक्ति न परिपालयेत् सः किंप्रभुः इति ख्यातः। अतः स्वामिभक्तः त्वमेव स्वामिनं प्रतिबोधय इति।

शुनकस्य वचनेन अस्वस्थः गर्दभः पुनरवदत् । अरे दुराचारिन् ! किं व्यर्थं प्रलपसि? विपत्तौ यः स्वामिनः उपेक्षां करोति सः पापी एव। दुरात्मन्! त्वं कर्तव्यस्य उपेक्षां करोषि चेत् अहमेव स्वामिनं निद्रातः जागरिष्यामि। इत्युक्त्वा स गर्दभः उच्चैः विरौति स्म। तच्छ्रुत्वा भग्ननिद्रः सः उदतिष्ठत् । गर्दभाक्रन्देनेन चोराः पलायिताः । परन्तु निद्राभङ्गेन क्रुद्धः रजकः गर्दभोऽयम् वृथा चीत्कारम् करोति इति विचिन्त्य दण्डेन अताडयत् च ।

“ **स्वधर्मे निधनंश्रेयः परधर्मो भयावहः ।** ”

✦ ✦ ✦ ✦

**पदच्छेदः -**

| | | | | | | |
|---|---|---|---|---|---|---|
| सम्यगाहारमपि | - | सम्यक् | + | आहारमपि । | | |
| पुनरपि | - | पुनः | + | अपि । | | |
| स्वामिभक्तश्चेत् | - | स्वामिभक्तः | + | चेत् । | | |
| गर्दभोऽयम् | - | गर्दभः | + | अयम् । | | |
| पुनरप्यवदत् | - | पुनः | + | अपि | + | अवदत् । |

**विग्रहः -**

स्वामिभक्तः - स्वामिनि भक्तिः यस्य सः ।

स्वामिभृत्यान् - स्वामिनः भृत्यः स्वामिभृत्यः तान् ।

भग्ननिद्रः - भग्ना निद्रा यस्य सः ।

## पठनप्रवर्तनानि

**पाठभागान्तर्गतानि अव्ययानि चित्वा पट्टिकारूपेण लिखतु।**

श्रद्धेयाः अंशाः :-

अव्ययज्ञानम्।

अर्थावबोधः।

पट्टिकाकरणम्।

**समानाशययुक्ताः कथाः सञ्चित्य कथासंपुटमेकं निर्मातु।**

श्रद्धेयाः अंशाः :-

आशयावबोधः ।

आकर्षकत्वम्।

वर्णनापाटवम्।

**पाठभागं पठित्वा गर्दभशुनकयोः सम्भाषणं संभाव्य विलिख्य कक्ष्यायामवतारयतु।**

श्रद्धेयाः अंशाः :-

लेखनसामर्थ्यम् ।

अवतारणम् ।

शैली ।

“ स्वधर्मे निधनं श्रेयः परधर्मो भयावहः । ” इत्याशयमधिकृत्य चर्चां प्रचालयतु टिप्पणीं लिखतु ।

श्रद्धेयाः अंशाः

आशयावबोधः ।

आशयप्रकटनम् ।

भागभागित्वम् ।

**शब्दकोशः**

| | | |
|---|---|---|
| परिणीतवान् | - | वरयामास। |
| प्रविष्टवन्तः | - | प्रवेशिताः । |
| कुत्सितः | - | निन्द्यः। |
| रुष्टः | - | कोपिष्टः । |
| प्रतिबोधयतु | - | ज्ञापयतु। |
| दुराचारिन् | - | दुष्कर्मनिरत । |
| प्रलपसि | - | भर्त्सयसि । |
| उपेक्षाम् | - | अलसताम्। |
| चीत्कारम् | - | उच्चैः कृतं गर्दभरोदनम् । |

# किमधिगतम्

**निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

# एककम् -२

## शास्त्रम्

### आमुखम्

गद्यपद्यात्मकस्य काव्यस्य शोभां विवर्धयितुं वृत्तालङ्कारादयः अत्यन्तमुपयुक्ताः भवन्ति।वृत्तानां विवरणं यस्मिन् शास्त्रे विवृणोति तद् छन्दशास्त्रमित्युच्यते। अलङ्कारादीनां विवरणं यत्र तदलङ्कारशास्त्रं च।अस्मिन् एकके केषाञ्चन अलङ्काराणां, वृत्तानां च विवरणं करोति।

### पठनाधिगमाः

- श्लोकान् पठित्वा अलङ्कारान् विवेचयति ।
- अलङ्कारान् लक्ष्यलक्षणपूर्वकं लिखति।
- गणव्यवस्थां पठति।
- वृत्तं लक्ष्यलक्षणपूर्वकं लिखति ।
- वृत्तानुसारं काव्यमालपति।

## पाठः - ४

# ।। अलङ्कारः ।।

**आमुखम्**

काव्यस्य शोभां वर्धयितुम् अलङ्काराः प्रयुज्यन्ते । अलङ्क्रियते इत्यलङ्कारः। प्रधानतया अलङ्काराः द्विधा। अर्थालङ्काराः शब्दालङ्काराः चेति । पाठेऽस्मिन् प्रतीपालङ्कारः, व्यतिरेकालङ्कारः, अर्थापत्तिः, विशेषोक्तिः इति चत्वारः अर्थालङ्काराः , यमकमिति शब्दालङ्कारः च निवेशिताः ।

## प्रतीपालङ्कारः ।

**" प्रतीपमुपमानस्योपमेयत्वप्रकल्पनम् ।"**

यत्र प्रसिद्धस्य उपमानस्य उपमेयत्वेन प्रकल्पनं तत्र प्रतीपालङ्कारः।

**उदाः-**

त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः ।

हे तन्वि ! तव लोचनसदृशं भवति पद्ममित्युदाहरणम्। तव वक्त्रसदृशः मुखतुल्यो विधुश्चन्द्रः इत्यपरमुदाहरणम् । तत्राद्ये प्रसिद्धोपमानस्य पद्मस्य द्वितीये उपमानस्य विधोः च उपमेयत्वप्रकल्पनात् प्रतीपालङ्कारः। अत्र उपमानयोः पद्मचन्द्रयोः अप्रसिद्धिकल्पनात् प्रतीपम्। तथा उपमेययोः उपमानत्वकल्पनमपि।

## व्यतिरेकालङ्कारः ।

**“ व्यतिरेको विशेषश्चेदुपमानोपमेययोः ।”**

उपमानोपमयेयोः विशेषः वैलक्षण्यं (वर्णितम्) चेत् व्यतिरेकालङ्कारः (व्यतिरेको नाम वैलक्षण्यम् । तच्च कदाचित् उपमानापेक्षया उपमेयस्य आधिक्ये न्यूनतायाम् अनुभये वा पर्यवस्यति। अत्र उपमेयोत्कर्षपर्यवस्यियि) साम्यमुक्त्वा वैधर्म्यम् उच्यते चेत् व्यतिरेकः।

**उदाः-**

शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः ।

सन्तः सज्जनाः शैलाः पर्वताः इव उन्नताः (शैलाः आकारे , सन्तस्तु चित्ते औन्नत्ययुक्ताः ) किन्तु (सन्तः) प्रकृत्या स्वभावेन कोमलाः मृदुलाः , शैलास्तु कठिना इति भावः। अत्र औन्नत्ये साम्यं प्रकृतिकोमलत्वे वैधर्म्यं च वर्तमानत्वात् व्यतिरेकालङ्कारः ।

## विशेषोक्तिः ।

**“ कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे।”**

पुष्कलकारणे - सम्पूर्णकारणे सत्यपि कार्याजनिः - कार्यानुत्पत्तिः विशेषोक्तिर्नामालङ्कृतिः।

**उदाः-**

हृदि स्नेहक्षयोनाभूत्स्मरदीपे ज्वलत्यपि ।

स्मरदीपे ज्वलत्यपि हृदि स्नेहक्षयः (तैलक्षयः) प्रेमक्षयश्च नाभूत् । अत्र दीपज्वलनरूपे तैलक्षयकारणे सत्यपि स्नेहक्षयाभावात् विशेषोक्तिः। स्मरे दीप्यमाने प्रेमक्षयो नाभूत् इति विवक्षया विरोधपरिहारः।

## काव्यार्थापत्यलङ्कारः।

**“ कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते।”**

कैमुतिकन्यायेन यत्र विवक्षितार्थसंसिद्धिः तत्र काव्यार्थापत्तिः ।

उदाः-

स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहाम् ।

आह्लादकारित्वेन प्रसिद्धः स इन्दुः तव मुखेन जितः । एवं सति सरसीरुहाणां कथा किमुत वक्तव्या? अस्मिन् उदाहरणे प्रसिद्धस्य इन्दोरुपरि मुखस्य जयेन पद्मादीनाम् उपरि जयमपि अनुक्तसिद्धम् इति लक्षणसमन्वयः ।

## यमकम् (शब्दालङ्कारः)।

**“ वर्णसङ्घातगोचरामावृत्तिं यमकं विदुः।”**

भिन्नार्थकस्य वर्णसङ्घातस्य व्यावृत्तिः- विशेषेण आवृत्तिः, पुनः पुनरुच्चारणं यमकमिति लक्षणम्। तच्च यमकं पदानां , श्लोकचरणानां आदौ मध्ये अन्त्ये वा भवति।

उदाः-

नवपलाशपलाशवनं पुरः
स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत्
ससुरभिं सुरभिं सुमनोभरैः।।

अस्मिन् श्लोके प्रथमपादे पलाशशब्दः , द्वितीये परागशब्दः, तृतीये लतान्तशब्दः, चतुर्थे सुरभिशब्दः च आवृत्य अर्थभेदेन प्रयुक्ताः इत्यतः अत्र यमकालङ्कारः।

## पठनप्रवर्तनानि

**अधोदत्तान् अलङ्कारान् लक्ष्यलक्षणसमन्वयपूर्वकं लिखतु ।**

(क) प्रतीपालङ्कारः, (ख) व्यतिरेकालङ्कारः, (ग) यमकम्

श्रद्धेयाः अंशाः -

अर्थग्रहणम् ।

अलङ्कारज्ञानम्।

लक्ष्यलक्षणसमर्थनम्।

**अधोदत्तानि उदाहरणानि पठित्वा अलङ्कारं निर्णयतु ।**

- स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहाम् ।
- शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः ।
- त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः ।

श्रद्धेयाः अंशाः -

अलङ्कारज्ञानम्।

विवेचनम् ।

लक्ष्यलक्षणसमर्थनम्।

**प्रतीपम्, विशेषोक्तिः , यमकम् इत्येतेषाम् अलङ्काराणां उदाहरणानि निर्धार्य लिखतु ।**

**श्रद्धेयाः अंशाः -**

उचितचयनम् ।

लक्षणावगतिः ।

समर्थनम्।

**यथोचितं योजयत ।**

| | | |
|---|---|---|
| हृदि स्नेहक्षयो नाभूत् स्मरदीपे ज्वलत्यपि | - | व्यतिरेकः। |
| त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः | - | विशेषोक्तिः। |
| शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः | - | प्रदीपम् । |

# किमधिगतम्

**निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

# पाठः - ५

# ।। वृत्तपरिचयः ।।

पद्यं चतुष्पादी। तच्छन्दोनिबद्धं भवति। छन्दयति आह्लादयति इति छन्दः। पद्यानि वृत्तनिबद्धानि भवन्ति।सम-अर्धसम-विषमवृत्तभेदेन त्रैविध्यम् इति अस्माभिः पठितपूर्वम्। अयं विभागः वर्णवृत्तविषये एव भवति। अस्मिन् पाठभागे वंशस्थम्,द्रुतविलम्बितम्, मालिनी, वसन्ततिलका, इति चत्वारि समवृत्तानि, वियोगिनी इति अर्धसमवृत्तम् च दत्तम्।

### भूतसंख्या

वृत्तशास्त्रे यतेः निर्णयार्थं भूतसंख्या उपयुज्यते।

यथाः-

| | | |
|---|---|---|
| रसः | - | षट् । |
| शैलः | - | सप्त । |
| मुनिः | - | सप्त । |
| भोगिः | - | अष्ट (सर्पः) । |
| लोकः | - | सप्त। |
| वसु | - | अष्ट । |
| सूर्यः | - | द्वादश । |
| अश्वः | - | सप्तः । |

## वंशस्थम्।

**" जतौ तु वंशस्थमुदीरितं जरौ। "**

यस्मिन् पद्ये प्रतिपादं जगण-तगण-जगण-रगणाः यथाक्रमं भवन्ति तत्र वंशस्थं नाम वृत्तं भवेत्। अत्र प्रतिपादं द्वादश वर्णाः भवेयुः।

उदा :-

जगणः तगणः जगणः रगणः
U - U - - U U - U - U -
विशङ्क/मानो भ/वतःप/राभवं
नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते
नयेन जेतुं जगतीं सुयोधनः।।

अस्मिन् श्लोके प्रतिपादं जगण तगण जगण रगणाः यथाक्रमं भवन्ति। अतः वंशस्थम् नाम वृत्तं भवति ।

## द्रुतविलम्बितम् ।

**" द्रुतविलम्बितमाह नभौ भरौ । "**

यस्मिन् पद्ये प्रतिपादं नगण -भगण -भगण -रगणाः यथाक्रमं भवन्ति चेत् द्रुतविलम्बितं नाम वृत्तं भवेत्। अत्र प्रतिपादं द्वादश वर्णाः भवेयुः।

उदा :-

नगणः भगणः भगणः रगणः
UUU -UU -UU -U-

पितुर/नन्तर/मुत्तर/कोसलान्

समधिगम्य समाधिजितेन्द्रियः।

दशरथः प्रशशास महारथो

यमवतामवतां च धुरि स्थितः।।

अस्मिन् श्लोके प्रतिपादं नगण -भगण -भगण -रगणाः यथाक्रमं भवन्ति। अतः द्रुतविलम्बितवृत्तं भवति।

## मालिनी

**" ननमयययुतेयं मालिनी भोगिलोकैः ।"**

यस्मिन् पद्ये प्रतिपादं नगण - नगण - मगण - यगण - यगणाः यथाक्रमं भवन्ति चेत् मालिनी नाम वृत्तं भवेत्। अत्र सप्तभिः ,अष्टभिः वर्णैः यतिः । प्रतिपादं पञ्चदशवर्णाः च भवेयुः। अत्र भोगिशब्देन अष्ट (अष्ट नागाः इति प्रसिद्धेः) लोकशब्देन सप्त (सप्तलोकाः इति प्रसिद्धेः) च गृह्यन्ते।

उदा :-

नगणः नगणः मगणः यगणः यगणः
U U U  U U U  - - -  U - -  U - -

इति वि/विधर/साभिः कौ/शिकव्या/हृताभिः

श्रुतिपथमधुराभिः पावनीभिः कथाभिः ।

गलितगहनकृच्छ्रं गच्छतोर्दाशरथ्योः

समकुचदिव सद्यस्तादृशं मार्गदैर्घ्यम्।।

अस्मिन् श्लोके प्रतिपादं नगण - नगण - मगण - यगण - यगणाः यथाक्रमं भवन्ति। अतः मालिनी नाम वृत्तं भवति। प्रतिपादं पञ्चदश वर्णाः । अत्र अष्टभिः, सप्तभिश्च यतिः ।

## वसन्ततिलका ।

**" उक्ता वसन्ततिलका तभजा जगौ गः । "**

यस्मिन् पद्ये प्रतिपादं तगण - भगण - जगण - जगणाः - गुरुः - गरुः च यथाक्रमं भवन्ति चेत् वसन्ततिलका नाम वृत्तं भवति। अत्र प्रतिपादं चतुर्दश वर्णाः भवेयुः।

उदा :-

तगणः भगणः जगणः जगणः गु गु
- - U  - U U  U - U  U - U  - -

वाचं नि/शम्य भ/गवान् स/ तु नार/दस्य

प्राचेतसः प्रवचसां प्रथमः कवीनाम्।

माध्यन्दिनाय नियमाय महर्षिसेव्यां

पुण्यामवाप तमसां तमसां निहन्त्रीम्।।

अस्मिन् श्लोके प्रतिपादं तगण - भगण - जगण - जगणाः - गुरु - गरु च यथाक्रमं भवन्ति। अतः वसन्ततिलका नाम वृत्तं भवति।

## वियोगिनी। (ललिता) ।

**विषमे ससजाः गुरुः समे।**
**सभरालोऽथ गुरुर्वियोगिनी ।। "**

यस्मिन् पद्ये प्रथम-तृतीय- पादयोः सगण - सगण - जगणाः गुरुः तथा द्वितीय चतुर्थपादयोः सगण - भगण - रगणाः लघु गुरुः च भवन्ति चेत् वियोगिनी (ललिता) नाम वृत्तं भवति।

उदा :-

| सगणः | सगणः | जगणः | गु |
|---|---|---|---|
| U U - | U U - | U - U | - |
| अथत/ | स्यविभो/ | रनन्त/ | रो |

| सगणः | भगणः | रगणः | ल गु |
|---|---|---|---|
| U U - | - U U | - U - | U - |
| विजयी/ | सद्गुण/ | रत्नसा/ | गरः। |

बलभद्रसमानविग्रहो
वलभो नाम बभूव पार्थिवः ।।

अस्मिन् श्लोके प्रथम-तृतीय (विषमे ) पादयोः सगण - सगण - जगणाः गुरुः तथा द्वितीय चतुर्थपादयोः (समे) सगण - भगण - रगणाः लघु गुरुश्च भवन्ति । अतः वियोगिनी (ललिता) नाम वृत्तं भवति।

♥♥ ♥♥

## पठनप्रवर्तनानि।

**वृत्तं लक्षणसहितं समर्थयतु ।**

(क) मालिनी, (ख) वसन्ततिलका, (ग) वियोगिनी ।

**श्रद्धेयाः अंशाः**

वृत्तनिबद्धानां श्लोकानां चयनम्।
लक्षणसहितं समर्थनम् ।
वृत्तलक्षणज्ञानम्।

प्रदत्तान् श्लोकान् पठित्वा लक्ष्यलक्षणसमन्वयपूर्वकं वृत्तानि निर्णयतु।

(क) इतरपापफलानि यथेच्छया
वितर तानि सखे चतुरानन।
अरसिकेषु कवित्वनिवेदनं
शिरसि मा लिख मा लिख मा लिख ।।

(ख) किमपि किमपि मन्दं मन्दमासत्तियोगा-
दविरलितकपोलं जल्पतोरक्रमेण ।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत् ।।

(ग) रे हस्त दक्षिण! मृतस्य शिशोर्द्विजस्य
जीवातवे विसृज शूद्रमुनौ कृपाणम्।
रामस्य बाहुरसि निर्भरगर्भखिन्न -
सीताविवासनपटोः करुणा कुतस्ते।।

पठितवृत्तानुसारं श्लोकान् सञ्चिनोतु अवतारयतु ।

**श्रद्धेयाः अंशाः**

वृत्तज्ञानम् ।
तालबोधः।
आलपनसामर्थ्यम्।

# किमधिगतम्

**निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

# एककम् -३

# वैज्ञानिकम् ।

**आमुखम्**

शास्त्रादिविषयेषु यद् विशिष्टं ज्ञानमस्ति तद् विज्ञानमित्यभिधीयते । तदुक्तम्- विज्ञानं शिल्पशास्त्रयोः इति।भाषापठने व्याकरणशास्त्रस्य पठनम् अत्यन्तमुपारकं भवति। संस्कृतव्याकरणे पाणिनिमहर्षेः अष्टाद्ध्यायी सुप्रसिद्धा भवति। अष्टाद्ध्यायीसूत्रपाठाः सिद्धान्तकौमुदीव्याख्यानुसारं वैज्ञानिके अस्मिन्नेकके समाकलिताः ।

## पठनाधिगमाः

* सन्धिप्रकरणं पठति ।
* सन्धिकार्यं लिखति।
* सूत्रव्याख्यानं करोति ।
* पट्टिकां करोति ।

पाठः - ६

# ।। सन्धिप्रकरणम् ।।

आमुखम्

आशयप्रकाशनमेव भाषाणां धर्मः। लोके सुशब्दाः अपशब्दाः च प्रयुज्यन्ते। तत्र कः सुशब्दः कः अपशब्दः इति निर्णये व्याकरणज्ञानम् अवश्यं भावि। भारतेषु प्रसिद्धेषु व्याकरणग्रन्थेषु प्रथमस्थानमावहति पाणिनेः अष्टाध्यायी (पाणिनीयम्) । पाणिनिः पाणिनीये भारतवर्षे सर्वत्र प्रसृतायाः संस्कृतभाषायाः व्याकरणं सूत्रैः रचयामास। "नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् । उद्धर्त्तुकामः सनकादिसिद्धान् एतद्विमर्शे शिवसूत्रजालम्" ।। इति प्रथानुसारं माहेश्वरसूत्रण्याधारीकृत्यैव पाणिनीयसूत्राणि प्रवर्तन्ते। पाणिनीयमुपजीव्य भट्टोजिदीक्षितैः वैयाकरणसिद्धान्तकौमुदी रचिता । सिद्धान्तकौमुदीमाधारीकृत्य वरदराजाचार्यैः लघुसिद्धान्तकौमुदी आरचिता । तस्याः उद्धृतः अयं पाठभागः।

अल्पाक्षरमसन्दिग्धं
सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यञ्च
सूत्रं सूत्रविदो विदुः।।

ग्रन्थेऽस्मिन् संज्ञा - सन्धि - कारक - कृत्तद्धितसमासैकशेषसनाद्यन्तधातवः(शब्दवृत्तयः) प्रतिपाद्यन्ते। तेषु सन्धिप्रकरणे अच्सन्धिः, हल्सन्धिः, विसर्गसन्धिः, इति सन्धित्रयं सोदाहरणं पठामः।

## अच्सन्धिः

### १. इको यणचि । ६/१/८८

**इकः स्थाने यण् स्यादचि संहितायां विषये ।**

**उदाः-** सुध्युपास्यः, मध्वरिः, पित्राज्ञा, मात्रुपदेशः।

| | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| सुध्युपास्यः | - | सुधी | + | उपास्यः | - | इ | + उ | = | य् | + | उ | = | यु । |
| यद्यपि | - | यदि | + | अपि | - | इ | + अ | = | य् | + | अ | = | य । |
| मध्वरिः | - | मधु | + | अरिः | - | उ | + अ | = | व् | + | अ | = | व । |
| अण्वायुधम् | - | अणु | + | आयुधम् | - | उ | + आ | = | व् | + | आ | = | वा । |
| पित्राज्ञा | - | पितृ | + | आज्ञा | - | ऋ | + आ | = | र् | + | आ | = | रा । |
| धात्रंशः | - | धातृ | + | अंशः | - | ऋ | + अं | = | र् | + | अं | = | रं । |

टिप्पणिः - इक् - इ, उ, ऋ, लृ।

यण् - य्, व्, र्, ल्

अचि - अच्परे । अचः - स्वराः(अ आ इ ई उ ऊ ऋ लृ ए ऐ ओ औ)

(अइउण् इत्यतः ऐऔच् पर्यन्तानि माहेश्वरसूत्राणि समायोज्य अच् इति प्रत्याहारः ।)

### २. एचोऽयवायावः - ६/१/७८

**एचः क्रमात् अय्, अव्, आय्, आव् एते स्युरचि।**

**उदाः-** हरये, विष्णवे, नायकः, पावकः

| | | | | | |
|---|---|---|---|---|---|
| हरये | - | हरे + ए | - | हर् + अय् + ए | । |
| विष्णवे | - | विष्णो + ए | - | विष्ण् + अव् + ए | । |
| नायकः | - | नै + अकः | - | न् + आय् + अकः | । |
| पावकः | - | पौ + अकः | - | प् + आव् + अकः | । |
| उभावपि | - | उभौ + अपि | - | उभ् + आव् + अपि | । |
| सहनाववतु | - | सहनौ + अवतु | - | सहन् + आव् + अवतु | । |

**टिप्पणिः** - एचः अयवायवः इति पदच्छेदः।

एच् - ए, ओ, ऐ, औ। अयादयः - अय्, अव्, आय् आव् च ।

ए +अच् =अय् + अच् । ओ + अच् = अव् । ऐ + अच् = आय् । औ + अच् = आव् ।

ए, ओ, ऐ, औ, इत्येतेषां स्थाने क्रमेण अय् अव् आय् आव् एते स्युः अचि परे ।

**अन्यानि उदाहरणानि -**

हरयिह - हरे + इह = हर् + अय् + इह ।

गवे - गो + ए = ग् + अव् + ए ।

गवि - गो + इ = ग् + अव् + इ ।

तस्मायदात् - तस्मै + अदात् = तस्म् + आय् + आदात् (तस्मा अदात्) (यकारलोपश्च)

क्षीरनिधाविव - क्षीरनिधौ + इव = क्षीरनिध् + आव् + इव

## ३. आद्गुणः ६/१/८७

**अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात् ।**

**उदाः-**

उपेन्द्रः - उप + इन्द्रः, अ + इ = ए

गङ्गोदकम् - गङ्गा + उदकम्, आ + उ = ओ

रमेशः - रमा + ईशः, आ + ई = ए

**टिप्पणिः** - आत् गुणः इति पदच्छेदः। अ ए ओ एते गुणाः । पूर्वपरवर्णयोः स्थाने एकादेशः स्यात् ।

**अन्यानि उदाहरणानि -**

गणेशः - गण + ईशः - अ + ई = ए

यथेष्टम् - यथा + इष्टम् - आ + इ = ए

यथोचितम् - यथा + उचितम् - आ + उ = ओ

पुण्योदयम् - पुण्य + उदयम् - अ + उ = ओ

## ४ . उरण् रपरः १/१/५१

ऋकारस्य स्थाने योऽण् स रपरः सन्नेव प्रवर्तते। ऋकारस्थाने गुणः अर् । ऋकारस्य स्थाने वृद्धिः - आर् ।

**उदाः-** वर्षर्तुः - वर्षा + ऋतुः - आ + ऋ = अर् ।

**टिप्पणिः -** उः अण् रपरः इति पदच्छेदः। उः इत्यस्य ऋकारस्येत्यर्थः।।

## ५ . वृद्धिरेचि ६/१/८८

अवर्णादेचि परे वृद्धिरेकादेशः स्यात् । गुणापवादः ।

**उदाः-**

| | | | |
|---|---|---|---|
| कृष्णैकत्वम् | - | कृष्ण + एकत्वम् | - अ + ए = ऐ । |
| गङ्गौघः | - | गङ्गा + ओघः | - आ + ओ = औ । |
| देवैश्वर्यम् | - | देव + ऐश्वर्यम् | - अ + ऐ = ऐ । |
| कृष्णौत्कण्ठ्यम् | - | कृष्ण + औत्कण्ठ्यम् | - अ + औ = औ । |

**टिप्पणिः** - वृद्धिः एचि इति पदच्छेदः। इदं पूर्वोक्तस्य गुणस्यापवादः। आ ऐ औ एते वृद्धिसंज्ञकः। ऐच् - ऐ, औ

अन्यानि उदाहरणानि-

| | | | |
|---|---|---|---|
| तथैव | - | तथा + एव | - आ + ए = ऐ |
| लोकैकः | - | लोक + एक | - अ + ए = ऐ |
| लोकैश्वर्यम् | - | लोक + ऐश्वर्यम् | - अ + ऐ = ऐ |

## ६ . अन्तादिवच्च ६/१/८५

योऽयमेकादेशः स पूर्वस्यान्तवत् परस्यादिवच्च स्यात् ।

**उदाः-** अवेहि, शिवेहि।

**टिप्पणिः** - अन्तादिवत् + च इति पदच्छेदः । अन्तादिभ्यां तुल्यः आद्यन्तवत् इति विग्रहः।

## ७ . ओमाङोश्च ६/१/९५

**ओमि आङि च आत्परे पररूपमेकादेशः स्यात् ।**

**उदाः-**

अवेहि - अव + एहि

शिवेहि - शिव + एहि, शिव + आ + इहि (अत्र एकारः पूर्वान्तवत् भावेन आङ्)

शिवायोंनमः - शिवाय + ओं + नमः।

'आ + इहि' इत्यत्र 'आद्गुणः' इति गुणः एकारः पूर्वस्य आकारस्य परस्य इकारस्य च स्थाने। अयमेकादेशः एकारः पूर्वस्यान्ववत् स्यादिति आकारत्वेन आत्वेन गृह्यते । एवमत्र शिव + एहि इति स्थिते ओमाङोश्चेति अकारादाङि परे पूर्वरूपमेकादेशः। शिवेहि इति रूपम् । एवम् अव + एहि = अवेहि। 'अवेहि मां किङ्करमष्टमूर्तेः ' इति कालिदासः ।

**टिप्पणिः -** ओमाङोः च इति पदच्छेदः। अवर्णाद् ओमि (ओं शब्दे) आङि (आ इत्युपसर्गे) च परे पररूपमेकादेशः स्यात्

**अन्यदुदाहरणम् -**

कृष्णायों नमः - कृष्णाय + ओं + नमः ।

## ८ . अकः सवर्णे दीर्घः १६/१/१०१

**अकः सवर्णेऽचि परे पूर्वपरयोः दीर्घ एकादेशः स्यात् ।**

**उदाः-**

दैत्यारिः - दैत्य + अरिः।

श्रीशः - श्री + ईशः ।

गुरूपदिष्टः - गुरु + उपदिष्टः।

होतॄकारः - होतृ + ऋकारः ।

**टिप्पणिः -** अकः सवर्णे दीर्घः इति पदच्छेदः । अयं सवर्णदीर्घसन्धिरित्युच्यते ।

**अन्यानि उदाहरणानि -**

| | | |
|---|---|---|
| जनापवादः | - | जन + अपवादः। |
| गिरीशः | - | गिरि + ईशः। |
| गुरूपदेशः | - | गुरु + उपदेशः। |

## ९ . एङः पदान्तादति ६/१/१०९

**पदान्तादेङो अति परे पूर्वरूपमेकादेशः स्यात् ।**

**उदः-**

| | | |
|---|---|---|
| हरेऽव | - | हरे + अव । |
| विष्णोऽव | - | विष्णो + अव । |

**टिप्पणिः** - एङः पदान्तात् अति इति पदच्छेदः। पदान्तात् एङः (ए ओ इत्येतयोः) ह्रस्व अकारे परे पूर्वरूपमेकादेशः स्यात्। "एचोऽयवायावः" इत्यस्य अपवादः। अत् इति तपरत्वं तत्कालग्रहणार्थम् ।

**अन्यानि उदाहरणानि**

| | | |
|---|---|---|
| कालेऽस्मिन् | - | काले + अस्मिन्। |
| लोकेऽस्मिन् | - | लोके + अस्मिन्। |
| स्वप्नेऽपि | - | स्वप्ने + अपि। |
| कोऽत्र | - | कः + अत्र। |

## १०. ईदूदेद्द्विवचनं प्रगृह्यम् १/१/११

**ईदूदेदन्तं द्विवचनं प्रगृह्यं स्यात् ।**

**टिप्पणिः** - ईदूदेत् द्विवचनं प्रगृह्यम् इति पदच्छेदः । ईदन्तम् ऊदन्तम् एदन्तम् च द्विवचनं प्रगृह्यम्। ततः अचि परे प्रकृतिभावः।

## ११. प्लुतप्रगृह्या अचि नित्यम्  ६/१/१२५

**प्लुताः प्रगृह्याः च अचि परे नित्यं प्रकृत्या स्युः**

**उदाः-**

| | | |
|---|---|---|
| हरी एतौ | - | हरी + एतौ । |
| विष्णू इमौ | - | विष्णू + इमौ । |
| गङ्गेअमू | - | गङ्गे + अमू । |
| पचेते इमौ | - | पचेते + इमौ । |

## १२. अदसो मात्  १/१/१२

**'अदस्' शब्दावयवात् मकारात् परौ ईदूतौ प्रगृह्यौ स्तः।**

**उदाः-** अमी ईशाः - अमीः + ईशाः

रामकृष्णावमू आसाते - रामकृष्णावमू + आसाते।

**टिप्पणिः -** अदसः मात् इति पदच्छेदः। 'अदस्' शब्दावयवात् मकारात्परौ ईदूतौ प्रगृह्यौ स्तः।

**अन्यानि उदाहरणानि** -

| | | |
|---|---|---|
| देवा अमी आसाते | - | देवाः+अमी + आसाते । |
| बालकौ अमू आगच्छतः | - | बालकौ + अमू + आगच्छतः। |

# हल्सन्धिः

## १. स्तोः श्चुना श्चुः ८/४/४०

**सकारतवर्गयोः शकारचवर्गभ्यां योगे शकारचवर्गौ स्तः।**

**उदाः-**

चलच्चित्रम् - चलत् + चित्रम् । त् = च् स श-श
तच्चित्तम् - तत् + चित्तम् । त् = च्
चिज्जडम् - चित् + जडम् । द् = ज्
सज्जनम् - सत् + जनम् । द् = ज्
हरिश्शेते - हरिस् + शेते । स् = श्

**टिप्पणिः-** हल् व्यञ्जनाक्षराणि (ह य व र ल ञ म ङ ण न झ भ घ ट ध ज ब ग ढ द ख फ छ ठ थ च ट त क प श ष स), स्थानेऽन्तरतमः इति सूत्रानुसारं, वर्णानां स्थानक्रमानुसारम् आदेशाः भविष्यन्ति। (यथा त् + च, त = च, द् + च, द् = ज्, न् + च, न् = ञ्

त् थ् द् ध् न् (अत्र योगमात्रं विवक्षते)
च् छ् ज् झ् ञ्)

## २. ष्टुना ष्टुः ८/४/४१

**सकारतवर्गयोः षकारटवर्गाभ्यां योगे षकारटवर्गौ स्तः**

**उदाः-**

पेष्टा - पेष् + ता ।
पिनष्टि - पिनष् + ति ।
तट्टिका - तत् + टीका।
ईट्टे - ईट् + ते ।

## ३. यरोऽनुनासिकेऽनुनासिको वा ८/४/४५

**यरः पदान्तस्य अनुनासिके परे अनुनासिको वा स्यात् ।**

**उदाः-**

दिङ्मुखम् - दिक् + मुखम् ।
दिङ्मालम् - दिक् + मालम् ।
दिङ्नागम् - दिक् + नागम् ।
वाङ्मयम् - वाक् + मयम् ।
षण्मुखः - षट् + मुखः ।
अम्मयम् - अप् + मयम्।
चिन्मयम् - चित् + मयम् ।
त्वङ्मांसम् - त्वक् + मांसम् ।
विण्मूत्रम् - विट् + मूत्रम् ।

**टिप्पणिः -** यर् (हकाररहितानि व्यञ्जनानि (य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प श ष स)

## ४. तोर्लि ८/४/६०

**तवर्गस्य लकारे परे परसवर्णः स्यात् ।**

**उदाः-**

तल्लयः - तद् + लयः ।
विद्वाल्लिँखति - विद्वान् + लिखति ।
नकारस्यानुनासिको लकारः परसवर्णः ।

**टिप्पणिः** - तोः लिः इति पदच्छेदः । तवर्गस्य लकारे परे परसवर्णः स्यात् ।
तोः - तवर्गस्य। लि- लकारे परे ।

**अन्यानि उदाहरणानि -**

सुहृल्लाभः - सुहृद् + लाभः ।
उल्लसति - उद् + लसति।
मरुल्लोलिता - मरुत् + लोलिता ।

## ५. झयो होऽन्यतरस्याम् ८/४/६२

**झयः परस्य हस्य वा पूर्वसवर्णः स्यात् ।**

**उदाः-**

वाग्घरिः - वाग् + हरिः (वाग्हरिः)

**टिप्पणिः -** झयः हः अन्यतरस्याम् इति पदच्छेदः । पदान्तात् झयः परस्य हकारस्य पूर्वसवर्णः विकल्पेन स्यात् । अन्यतरस्याम् इत्यस्य विकल्पेन इत्यर्थः । संवारनादघोषमहाप्रणस्य हकारस्य तादृशः वर्गचतुर्थः घकारोऽत्र। अनुनासिकं विहाय वर्गाक्षराणि झयः।

**अन्यानि उदाहारणानि -**

तद्धितम् - तद् + हितम् (अत्र तवर्गे चतुर्थः धकारः)
अज्झस्वः - अच् + ह्रस्वः (अत्र चवर्गे चतुर्थः झकारः)
स्याडट्रस्वश्च - स्याट् + ह्रस्वश्च (अत्र टवर्गे चतर्थः ढकारः)

## ६. शश्छोऽटि ८/४/६३

**पदान्ताद् झयः परस्य शस्य छो वा स्यादटि ।**

**उदाः-**

तच्छिवः - तत् + शिवः - तच् + शिवः - तच् + छिवः।
जीवच्छवः - जीवत् + शवः जीवच् + शवः जीवच् + छवः ।

**टिप्पणिः-** शः छः अटि इति पदच्छेदः । झय् - झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प । पदान्तात् झयः परस्य शकारस्य छः स्यात् अटि । अट् - अ इ उ ऋ

लृ ए ओ ऐ औ ह य व र । अटि- अट्परे ।

**अन्यानि उदाहरणानि -**

तच्छान्तिः - तत् + शान्तिः । (तच् शान्ति)
तच्छ्रुत्वा - तत् + श्रुत्वा । (तच् श्रुत्वा)
विद्युच्छक्तिः - विद्युत् + शक्तिः । (विद्युच् शक्तिः)
तावच्छ्रुत्वा - तावत् + श्रुत्वा । (तावच् श्रुत्वा)

## ७. मोऽनुस्वारः ८/३/२३

**मान्तस्य पदस्यानुस्वारः स्याद्धलि।**

**उदाः-**

हरिं वन्दे - हरिम् + वन्दे ।

**अन्यमुदाहरणम्** - संस्कृतं पठति - संस्कृतम् + पठति ।

**टिप्पणिः-** मः अनुस्वारः इति पदच्छेदः । मकारान्तस्य पदस्य हलि (व्यञ्जनाक्षरे) परे अनुस्वारः स्यात्। पदान्तस्य मकारस्य अनुस्वारः स्यात् हल्परे। स्वरे परे मकार एव स्यात् ।

यथा - श्रीरामोदन्तमाख्यास्ये - श्रीरामोदन्तम् + आख्यास्ये ।

## ८. नश्चापदान्तस्य झलि ८/३/२४

**नस्य मस्य च अपदान्तस्य झलि अनुस्वारः स्यात् ।**

**उदाः-**

यशांसि - यशान् + सि ।
आक्रंस्यते - आक्रम् + स्यते।

झलि किम् ? मन्यते मन् + यते, नम्यते - नम् + यते ।

यकारस्य झलि अनन्तस्य नकारस्य मकारस्य च झलि परे अनुस्वारः स्यात् ।

**टिप्पणिः** - अपदान्तस्य नकारस्य मकारस्य च झलि परे अनुस्वारः स्यात् ।

झल् - झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प श ष स ह

**उदाः-**

अंचितः - अन् + चितः

वंचितः - वन् + चितः

शांतः - शाम् + तः

## ९. अनुस्वारस्य ययि परसवर्णः ८/४/५८

**अनुस्वारस्य परसवर्णः स्यात् ययि परे ।**

**उदाः-**

अन् + चितः - अंचितः - अञ्चितः ।

वन् + चितः - वंचितः - वञ्चितः।

शाम् + तः - शांतः - शान्तः ।

**टिप्पणिः-** अनुस्वारस्य ययि परे परसवर्णः स्यात् ।

यय् - य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प ।

## १०. वा पदान्तस्य ८/४/५९

**पदान्तस्य अनुस्वारस्य ययि परे परसवर्णो वा स्यात् ।**

**उदाः-** त्वङ्करोषि - त्वं + करोषि।

**टिप्पणिः -** त्वं करोषि अत्र 'वा पदान्तस्य' इति विकल्पेन परसवर्णे 'ङकारे' त्वङ्करोषि इति । परसवर्णाभावपक्षे 'त्वं करोषि' इति रूपम् ।

**उदाहरणान्तरम् -** अलं + कारः - अलङ्कारः, अलंकारः

## ११. न श्छव्यप्रशान्   ८/३/७

**अम् परे छवि नकारान्तस्य पदस्य रुः स्यात् न तु प्रशान्शब्दस्य ।**

नः छवि अप्रशान् इति पदच्छेदः ।

अम् - अ इ उ ऋ लृ ए ओ ऐ औ- स्वराः + हकारः + य व र ल - अन्तस्थाः + ञ म ङ ण न अनुनासिकाश्च

छव् - छ ठ थ च ट त ।

## १२. अत्रानुनासिकः पूर्वस्य तु वा ८/३/२

अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात् ।

## १३. अनुनासिकात्परोऽनुस्वारः ८/३/४

अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः स्यात् । अत्र वक्ष्यमाणाभ्यां "खरवसानयोर्विसर्जनीयः" "विसर्जनीयस्य सः" इति सूत्राभ्यां रेफस्य विसर्गस्य सकारश्च ।

**उदाः -** चक्रिँस्त्रयस्व, चक्रिंस्त्रायस्व

चक्रिन् + त्रायस्व

चक्रिर् + त्रायस्व

चक्रिँर् + त्रायस्व

चक्रिंर् + त्रायस्व

चक्रिँः + त्रायस्व

चक्रिंस्त्रायस्व

**अन्यदुदाहरणम् -**

श्रीमंस्तुभ्यम् , श्रीमँस्तुभ्यम् - श्रीमन् + तुभ्यम्, श्रीमर् तुभ्यम् । श्रीमँ र् तुभ्यम्, श्रीमंर् तुभ्यम्। श्रीमँः तुभ्यम्- श्रीमंः तुभ्यम् ।

## विसर्गसन्धिः

### १. खरवसानयोर्विसर्जनीयः । ६/३/१५

**खरि अवसाने च पदान्तस्य रेफस्य विसर्गः स्यात् ।**

हरिर् + तत्र, हरिः तत्र । रामर् - रामः, शिवर् शिवः

### २. विसर्जनीयस्य सः । ८/३/३४

**खरि परे विसर्जनीयस्य सः आदेशः स्यात्**

**उदाः-**

| | | |
|---|---|---|
| नमस्ते | - | नमः + ते |
| भयस्त्राता | - | भयः + त्राता |
| बकस्तत्र | - | बकः + तत्र |

**टिप्पणिः-** विसर्जनीयस्य इत्यस्य विसर्गस्य इत्यर्थः। खर् ख फ छ ठ थ च ट क प श ष स ।

### ३. ससजुषो रुः । ८/२/६६

**पदान्तस्य सस्य सजुषश्च रुः स्यात् ।**

**उदाः-**

| | | |
|---|---|---|
| बालस् | - | बालर् विसर्गे बालः । |
| वानरस् | - | वानरर् विसर्गे वानरः। |

**टिप्पणिः -** सस्य - सकारस्य ।

### ४. अतो रोरप्लुतादप्लुते । ६/१/११३

**अप्लुतादतः परस्य रोः उः स्यात् अप्लुते अति परे । (स्वराणां ह्रस्वदीर्घप्लुतभेदेन त्रैविध्यमस्ति। यथा ऊकालोऽज्झ्रस्वदीर्घप्लुतः इति सूत्रेण ( १-१-२७)। तदुक्तम् -**

**एकमात्रोऽच् भवेद्ध्रस्वो**
**द्विमात्रो दीर्घ उच्यते।**
**त्रिमात्रस्तु प्लुतो ज्ञेयो**
**व्यञ्जनं त्वर्धमात्रकम् ।। इति।।**

**उदाः-**

छात्रोऽहम् - छात्रस् + अहम् ।
ससजुषोरुः - छात्रर् + अहम् ।
अतो रोरप्लुतादप्लुते - छात्र + उ + अहम् ।
आद्गुणः - छात्रो + अहम् ।
एङः पदान्तादति - छात्रोऽहम्
एवं शिष्योऽहं, शिवोऽहम् , रोः - रेफस्य। अति- अत्परे ।

## ५. हशि च । ६/१/११४

अप्लुतादतः परस्य रोरुः स्यात् हशि परे।

उदाः-

ग्रामो गम्यः - ग्रामस् + गम्यः।
ससजुषोरुः - ग्रामर् + गम्यः ।
हशि च - ग्राम + उ + गम्यः।
आद्गुणः - ग्रामो गम्यः ।

**टिप्पणिः-** सकारस्थानिकस्य रेफस्यैव उत्वम् न तु स्वतः सिद्धस्य । यथा - शिवो वन्द्यः देवो वन्द्यः, अतः पुनरत्र, प्रातरत्र इत्यादौ उत्वं न । हश् हयवर ....... जवगडदश्

## ६. भो भगो अघो अपूर्वस्य योऽशि । ८/३/२७

भो भगो अघो अपूर्वस्य रोर्यादेशः स्यादशि ।

उदाः-

सिंहा यान्ति, सिंहास् + यान्ति, सिंहार् + यान्ति, सिंहाय् + यान्ति । एवं देवा यान्ति, मृगा यान्ति, वानरा यान्ति ।

७. हलि सर्वेषाम् । ८/३/२२

भो भगो अघो अपूर्वस्य यस्य नित्यं लोपः स्यात् हलि ।

उदाः-

सिंहा यान्ति - सिंहास् + यान्ति । देवा यान्ति , देवास् + यान्ति , देवार् + यान्ति, देवाय् + यान्ति।

भो देवाः भोस् + देवाः , भोर् + देवाः, भोय् + देवाः ।

भगो नमस्ते, भगोस् + नमस्ते, भगोर् + नमस्ते, भगोय् + नमस्ते।

अघो याहि - अघोस् + यहि, अघोर् + यहि, अघोय् + यहि।

**टिप्पणिः-** यत्र "हशि च" अतोरोरप्लुतादप्लुते इति सूत्रयोः अप्रवृत्तिः तत्रैव "भो भगो अघो अपूर्वस्य योऽशि" इति सूत्रं प्रवर्तते।

## ८. रो रि । ८/३/१४

**रेफस्य रेफे परे लोपः स्यात् ।**

**उदः-**

स्वाराज्यम् - स्वर् + राज्यम् । स्व + राज्यम्, स्वाराज्यम् ।(ढ्रलोप इति वक्ष्यमाणेन दीर्घः)

स्वर्गराज्यमित्यर्थः।

स्वालोकम् -स्वर् + लोकम्, स्व + लोकम्, स्वालोकम्। स्वर्गलोकमित्यर्थः (रलयोरभेदः)

## ९. ढ्रलोपे पूर्वस्य दीर्घोऽणः । ६/३/१११

**ढरेफयोर्लोपनिमित्तयोः पूर्वस्याणो दीर्घः स्यात् ।**

**उदाः -**

पुना रमते - पुनर् +रमते , पुनस् + रमते ।

हरी रम्यः - हरिस् +रम्यः , हरिर् + रम्यः, हरिस् + रम्यः।

शम्भू राजते - शम्भुस् +राजते, शम्भुर् + राजते, शम्भुस् + राजते ।

**टिप्पणिः-** ढ्रलोपे पूर्वस्य दीर्घः अणः इति पदच्छेदः। लोपनिमित्तयोः ढकाररेफयोः पूर्वस्य अणः (अइउ) दीर्घः स्यात्।

एवं धनूरहस्यम् दाशरथी रामः, निषधाधिपती राजा इत्यादीनि उदाहरणानि।

## १०. एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ।६/१/१३२

**अककारयोरेतत्तदोर्यः सुस्तस्य लोपः स्याद् हलि न तु नञ्समासे।**

**उदाः-**

एष बालः - एषः + बालः, एषस् + बालः ।

एष रामः - एषः + रामः, एषस् + रामः।

एष विष्णुः - एषः +विष्णुः, एषस् + विष्णुः ।

एष शम्भुः - एषः + शम्भु, एषस् + शम्भुः।

सः अपि । अत्र सुलोपो न (सोऽहम्)

**टिप्पणिः-** एतत्तदोः सुलोपः अकोः अनञ्समासे हलि इति पदच्छेदः। ककाररहितयोः एषको रुद्रः (सकः शिवः। अत्र लोपो न ककारसहितत्वात्) एतद् तद् शब्दयोः यः सुप्रत्ययः तस्य लोपः स्यात् हलि परे, नञ् समासे न प्रवर्तते ।

## पठनप्रवर्तनानि

१. अ

(यद्यपि, देवैश्वर्यम्, गङ्गे अमू, सुहृल्लाभः, हरिं वन्दे, ग्रामो गम्यः, अवेहि, पावकः, वाग्घरिः, अमी ईशाः, आक्रंस्यते, देवा यान्ति, गवे, रमेशः, गुरूपदिष्टः, तद्धितम् , सज्जनम् , शान्तः स्वालोकम् , पुण्योदकम्, हरेऽव, तट्टीका, जीवच्छवः, त्वङ्करोषि, हरी रम्यः, वर्षर्तुः, लोकेऽस्मिन्, वाङ्मयम्, तच्छ्रुत्वा, नमस्ते, एष विष्णुः, शिवोऽहम्। )

| अच्सन्धिः | हल्सन्धिः | विसर्गसन्धिः |
|---|---|---|
| | | |

**श्रद्धेयाः अंशाः।**

उचितः पदच्छेदः

सन्धिविवेचनम्।

वर्गीकरणम्।

**२. अधो दत्तं श्लोकं पठित्वा सन्धियुक्तपदानि विविच्य सन्धिकार्यं निर्दिशतु**

व्ययश्चेदधिकः श्रीमंस्तुभ्यं प्रत्यागते मयि ।
प्रदास्यामि तदित्युक्त्वा प्रतस्थे स कृपानिधिः।।

**श्रद्धेयाः अंशाः ।**

सूत्रनिर्देशः ।

सन्धियुक्तानां विवेचनम्।

सन्धिकार्यनिर्देशः।

**३. प्रदत्तानां सूत्राणाम् आशयमधिकृत्य चर्चां कृत्वा उदाहरणानि लिखतु ।**

अकः सवर्णे दीर्घः । इको यणचि ।स्तोः श्चुना श्चुः । विसर्जनीयस्य सः

श्रद्धेयाः अंशाः ।

सूत्रवृत्तिज्ञानम् ।
सूत्रस्याशयवगमः ।

## अधिकविस्तरः

वर्णः - अविभाज्यनादो वर्णः ।

स्वरः - स्वयमुच्चारणार्हो वर्णः,तद्भिन्नं व्यञ्जनम् ।

ह्रस्वस्वरः - एकया मात्रया उच्चार्यमाणः स्वरः । ( एकमात्रोऽच् ह्रस्वः) यथा अ इ उ ऋ इत्यादयः ।

दीर्घस्वरः - मात्राद्वयेन उच्चार्यमाणः स्वरः दीर्घः । यथा आ ई ऊ ॠ इत्यादयः ।

अष्टाध्यायी - अष्टाध्यायी अथवा पाणिनीयम् - पाणिनिना विरचितः संस्कृतव्याकरण ग्रन्थः। ग्रन्थोऽयम् अष्टभिरध्यायैः विभक्तः । अध्यायं प्रति चत्वारः पादाः सन्ति। अध्यायः, पादः, सूत्रम् इति क्रमेण सूत्राणाम् अन्ते संख्या दत्ताः यथा अदेङ्गुणः १-१-२ (प्रथमाध्याये प्रथमपादे द्वितीयं सूत्रमित्यर्थः) ।

प्रत्याहारः - प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा अस्मिन् इति प्रत्याहारः । 'आदिरन्त्येन सहेता' इति सूत्रेण प्रत्याहारसंज्ञा विधीयते ।

| | | |
|---|---|---|
| माहेश्वरसूत्रेषु पूर्वणकारेण एकः प्रत्याहारः | - | अण् । |
| ककारेण त्रयः | - | अक् इक् उक् । |
| ङकारेण एकः | - | एङ्। |
| चकारेण चत्वारः | - | अच् इच् एच् ऐच् । |

| | | |
|---|---|---|
| टकारेण एकः | - | अट् |
| परेण णकारेण त्रयः | - | अण् इण् यण् |
| मकारेण चत्वारः | - | अम् यम् ञम् ङम् |
| ञकारेण एकः | - | यञ् |
| षकारेण द्वौ | - | झष् भष् |
| शकारेण षट् | - | अश् हश् वश् झश् जश् बश् । |
| वकारेण एकः | - | छव् |
| यकारेण पञ्च | - | यय् मय् झय् खय् चय् । |
| रेफेण पञ्च | - | यर् झर् खर् चर् शर् । |
| लकारेण षट् | - | अल् हल् वल् रल् झल् शल् । |
| अकारेण एकः | - | र प्रत्याहारः इति |

प्रत्याहाराः चतुश्चत्वारिंशत् ।

स्यादेको ङञणवटैः षेणद्वौ त्रय इह कणाभ्याम् ।
चत्वारश्च चमाभ्यां पञ्चयराभ्यां शलाभ्यां षट् ।।

वार्तिकम् - उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते ।
तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञा मनीषिणः।।

भाष्यम् - सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।।

व्याकरणमहत्वम् - छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
शिक्षा घ्राणं तु वेदस्य निरुक्तं श्रोत्रमुच्यते ।।
ज्योतिषामयनं चक्षुः मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयसे ।।

पाणिनिः - येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः।।

# किमधिगतम्

**निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√ ) क्रियताम्**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १ | | | | | |
| २ | | | | | |
| ३ | | | | | |
| ४ | | | | | |
| ५ | | | | | |
| ६ | | | | | |

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।